कर्मान्तिकः संनिधाता रूपाद्यधिकृतस्तथा ॥११०॥
मन्त्रपारिषदः पौरव्यावहारिकनायकौ ।
आटविको दुर्गपालो दण्डेश इति षट् त्रिकाः ॥१११॥
तीर्थानि शत्रुपक्षे स्युर्येषु चारः प्रयुज्यते ।
समाहर्तृप्रशास्तारौ[3]नायकं चापवर्त्त्य तु ॥११२
महिषी मुख्यमन्त्री च वैद्यश्चेति पठन्ति ये ।
तेषामिमे त्रयः स्वीयाश्चाराणां स्युरगोचराः ॥ ११३॥
अतः स्वपक्षे तीर्थानि भवन्ति दश पञ्च च ।
चरन्ति पुरुषाः शत्रुपक्षे चेति चरास्त्रयः ॥ ११४ ॥
प्राज्ञा[4]दर्शननास्तिक्यप्रमादालसताक्रुधः ।
असत्यं दीर्घसूत्रत्वमेकेन बहुभिः सह ॥ ११५ ॥
प्रकाशे च त्रयो मन्त्रा मन्त्रितत्याग एव च ।
अघसंग इति ज्ञेया दोषा द्वादश भूपतेः ॥ ११६ ॥

---

१ द्रव्यं[B] ?   २ शास्ति[BK]   ३ नायकं[CK]   ४ प्रज्ञा [B]

कामक्रोधौ लोभ[१]हर्षौ मानश्चापि मदः पुनः ।
अन्तर्गतोऽरिषड्वर्गः प्राणस्य क्षुत्तृषे पुनः ॥ ११७॥
शोकमोहौ तु मनसो जरामृत्यू च वर्ष्मणः ।
षडूर्मयोतिवृष्टिः[२] स्यादवृष्टिः शलभाः शुकाः ॥ ११८ ॥
आखु[३]स्वपरचक्राणि सप्तैता ईतयः[४]पुमान् ।
भृत्यैर्मित्रैश्च मन्त्रैश्च[५]बलं त्रिविधमुच्यते ॥ ११९ ॥
हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ।
षडङ्गं भारिकस्वाभ्यां वारदैशिकयोद्धृभिः ॥ १२० ॥
सकर्मकारैरष्टाङ्गं प्रतप्तस्तु प्रतापवान् ।
सौम्योधिगम्यो ऽथ[६]शुचिरुपधातीतकः समौ ॥ १२१
पौराद्यनुग्रहे युक्तो वृत्तिर्व्यावृत्तिरन्यतः ।
पक्षे पक्षे तुलामानं[७]भाण्डार्घप्रत्यवेक्षणम् ॥ १२२ ॥
संमाननं च मान्यानां लब्धप्रशमनानि षट् ।
प्रतिभोगप्रातिभोगौ शाकादेरुपढौकनम्[८] ॥ १२३ ॥
शूद्रकन्याकरो[९]यः स्यात्स च[१०]गौरीवराढ[११]कम् ।
राधाचक्रं तु तद्यन्त्रे चले यन्मील्यलोचनम् । १२४
प्रतिबिम्बेक्षणवशादूर्ध्वं वेध्यमधोमुखम् ।
तद्वेधनादिकं कर्म वीर्यशुल्कमिति स्मृतम् । १२५

---

१ लाभ[KC] २ स्यादवृष्टिः इति[K] पुस्तके नास्ति ३ आखू[KC] ४ पुनः ?
५ त्रिविधं बल[B] ६ स्योंश[KC] ७ भाण्डाद्यं[B] ८ कौटनम्[KC] ढौकनम्[BS]
९ ब्यः १० तु ११ वराटकम्

अधिकारः प्रक्रिया स्त्री द्वयोश्चमरचामरे ।
लोमगुच्छः पुमान् क्लीबे चारतूलमथ त्रिषु ॥ १२६ ॥
छत्रं तु नृपचिन्हार्थं राजशृङ्गार्थकं च षण् ।
हैमदण्डं[1] चातपत्रमुत्कूटं[2] चोष्णवारणम् ॥ १२७ ॥
चक्रपर्यायितोङ्गार्थं भृङ्गालुः कनकालुका ।
[3]निवेशः शिविरं क्लीबं सज्जनं तूपरक्षणे[4] ॥ १२८ ॥
रथो गजोऽश्वः पादातः सेनाङ्गं स्याच्चतुर्विधम् ।
युद्धा[5]र्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः ॥१२९॥
वङ्कुरो मूलविभुजो यद्वो[6]प्यस्त्री विमानकः ।
सक्रीडार्थः पुष्यरथो देवार्थस्तु मरुद्रथः ॥ १३० ॥
योग्या स्त्रियां वैनयिकोऽध्वरथः पारियानिकः ।
कर्णीरथः प्रवहणं[7]डयनं ह्यनं समे[8] ॥ १३१ ॥
शकटोऽस्त्रीत्वनः क्लीबे शकटिः शकटी स्त्रियौ ।
त्रिषु काम्बल[9]वास्त्राद्यास्तैस्तैः परिवृते रथे ॥ १३२॥
सपाण्डुकलीयो यः संवीतः पाण्डुकम्बलैः ।
स तु ज्ञेयश्च वैय्याघ्रो यो वृतो व्याघ्रचर्मणा ॥१३३।
एवं द्वीप्यादिचर्मादिसंवीते द्वैप इत्यपि ।
रथार्थात्पादपर्यायमङ्गपर्यायमस्त्रियाम् ॥ १३४ ॥

---

१ हिमदण्डं[KC] २ मुकुटं[C] मुत्कूटं[KB] ३ निवेशं[KC] ४ णम्[B]
५ र्थै[B] ६ थ[B] ७ नै[B] ८ मम्[BK] ९ वस्त्रा[K]

चक्रं पुमानरिर्द्धा[1]रानेमी स्त्री नेमिरित्यपि ।
प्रधिरस्त्री द्वयोराणिः स्त्रियामाणीति चाप्यणी ॥ १ ३ ५॥
रथाग्रकीलकेनाभिर्नाभी चक्रस्य पिण्डिका ।
स्त्रियामथो ना कुवरः कूवरो ना युगंधरः ॥ १३६ ॥
अस्त्रियामप्यथ युगमस्त्री यानमुखं पुनः ।
[2]ईषान्तबन्धनं चापि धूर्द्धूर्वी च स्त्रियावुभे ॥१ ३ ७॥
युगान्तकीले[3]शम्या स्त्री तत्स्थाने गर्त्तमद्वयोः ।
अनुकर्षो दार्वधस्थ[4]मासङ्गस्तु युगान्तरम् ॥ १ ३८ ॥
रथगुप्तिर्वरूथाऽस्त्री[5]स्यूरथाङ्गा[6]न्युपस्कराः ।
नियन्ता प्राजिता यन्ता सूतः सव्येष्ठृ[7]सारथी ॥१३९॥
दक्षिणेस्थप्रचेतारौ क्षत्ता रथकुटु[8]म्बिकः ।
रथिनः स्यन्दनारोहा रथिका रथिरा अपि ॥१४०॥
रथव्रजे स्त्रियां रथ्या रथकड्याप्यथ स्त्रियाम् ।
द्वयोः प्रेङ्खा तु दोला स्त्री यानं वा पुंसि न स्त्रियाम् ॥१४१॥
विमानेऽथ वराङ्गः स्याद्वारणो मृग इत्यपि ।
हस्ती दन्तावलो दन्ती सिन्धुरो दीर्घमारुतः ॥१४२॥
मातङ्गो राजिलः पीलुर्जलकान्तो महामृगः ।
मतङ्गः सामजः कुम्भी कुञ्जरोऽनेकपो द्विपः ॥१४३॥

---

१ नरिर्धारा ? २ इषान्त[B] ३ शस्या[B] ४ स्यंप्रा[B] ५ स्यु[B] ६ न्यप ?
७ ष्ठ [B] ८ म्बन:[B]

निर्लूनः करटी नाग इभः स्तम्बेरमो गजः ।
करी मतङ्गजः पद्मी [1]शूर्पकर्णो लतारतः[2] ॥१४४॥
पिण्डपादः पुष्करी स्याच्छुण्डारी[3] कज इत्यपि ।
विलोमरसनार्थः स्याद्द्वैर्दन्तार्थविषाणकः ॥१४५॥
द्वयोः करेणुर्वेतण्डः पेचकी पुष्करी[4] जटी ।
जलाकांक्षो महाकायोऽप्रस्वेदः सूचिकाधरः ॥१४६॥
शुण्डालः पिच्छिलश्चापि ध्वजोऽस्त्री चासुरः कपिः ।
गम्भीरवेदी च करी करिणी धेनुका वशा ॥१४७॥
करेणुश्च करेणूश्च रेणुका च करेणुका ।
कणेरुश्च गणेरुश्च स्त्रियामथ च तद्भिदः ॥१४८॥
पञ्चवर्षो गजो[5]बालः पोतस्तु दशवार्षिकः ।
[6]विक्को दिक्कोपि विंशाब्दस्त्रिंशाब्दः कलभोऽस्त्रियाम् ॥१४९
षष्टिवर्षो युवार्थः स्याच्छुण्डारोऽपि मतः स च ।
स्यादशीतेस्तु वृद्धोऽथ यद्गन्धाघ्राणतोऽपरे ॥१५०॥
न तिष्ठन्ति गजाः सस्याद्गन्धहस्ती ततः पुनः ।
चतुर्विधा गजा भद्रो मन्द्रो मिश्रो मृगोऽपि च ॥१५१॥
एषामाकरजा भेदा विज्ञेया बहवो बुधैः ।
गङ्गासागरहिमाद्रिप्रयागाणां च मध्यतः ॥१५२॥

---

१ सू[K] २ रते:[B] ३ ण्ड[C] ४ ली[B] ५ बालः पोरुस्तुदश[K] पुस्तके नास्ति
६ विष्को [B]

[१]च्यवनं* ( स्यात् ) मध्यमं तल्लोहिताब्धेश्च पश्चिमे ।
त्रिपुर्यां[२]को सलादौ च चेदिका[३]रूषकं वरम् ॥१५३॥
श्रीक्षेत्रं गौडबङ्गाल[४]माङ्गिरेयं तु मध्यमम् ।
विन्ध्याद्रि[५]वेङ्कटाद्रेश्च कलिङ्गद्रविडावपि ॥१५४॥
वनं कालीयकं नाम समुद्रावधिमध्यमम् ।
श्रीशैले देवशैले च मलये पर्वते वनम् ॥१५५॥
दाशार्णकं वनं तस्या[६]द्वरं सह्याद्रिमूलतः ।
भृगुकच्छा[७]वधि वनमपरान्तं च मध्यमम् ॥१५६॥
द्वारवत्यां च सौराष्ट्रे कलिङ्गवनमुत्तमम् ।
कालंजरे कुरुक्षेत्रे सिन्धुसागरसंगमे ॥१५७॥
वनं पाञ्च[८]नदं नाम मध्यमं परिकीर्त्तितम् ।
कालेप्यजातदन्तो यः स्वल्पाङ्गः स च मत्कुणः ॥१५८॥
यूथपर्यायनाथार्थः[९] प्रभिन्ने मत्तगर्जितौ ।
मदोत्कटो मदकलः समावुद्भ्रान्तविर्मदौ ॥१५९॥
कल्पितः सज्जितस्तिर्यग्घाती परिणतश्च सः ।
व्यालोत्रऽदुष्टे गम्भीरवेदी त्ववमताङ्कुशः ॥१६०॥
[१०]दण्डारारालसुषभा यत्रारोहति पार्थिवः ।
राजवाह्यस्तूपवाह्यः सान्नाह्यः समरोचितः ॥१६१॥

---

१ नाच्यं वनं KC २ र्याः KC ३ कारुपकं B ४ मागिरेयं B ५ व्यङ्क B विक K
६ द्वनं B ७ कण्ठा KC ८ वनं KC ९ नामा KC १० दण्डरा C
* प्राच्यं वरं पाठो भवेत् ।

[1]ईषार्थदन्तपर्याय उग्रपर्यायदन्तके ।
स्त्रियां समूहे घटना घटा यूथं नपुंसकम् ॥१६२॥
मदो दानं प्रवृत्तिश्च वमथुः करसीकरः ।
करिनासा तु हस्तार्थः शुण्डा शुण्डार इत्ययम् ॥१६३॥
अस्याग्रं पुष्करं क्लीबेऽङ्गुलं स्यात्तस्य कर्णिका ।
विषाणावस्त्रियां पुंसि दन्तौ ना स्कन्ध आसनम् ॥१६४॥
कर्णमूलं चूडिका[2]स्यादीषीका त्वक्षिकूटकम् ।
अपाङ्गदेशो निर्याणं गण्डस्तु करठः कठः ॥१६५॥
कट[3]कोप्यथ कुम्भ्यक्षि[4]कूटे स्यादिषीकेषिका* ।
अवग्रहो ललाट[5]स्याद्विदुः[6] पुंस्युभयान्तरम् ॥१६६॥
कुम्भौ तु शिरसःपिण्डौ तयोर्मध्ये पिचुः पुमान् ।
घातकुम्भस्तयोः संधिरारक्तस्तु ततोऽप्यधः ॥१६७॥
वाहित्थं तदधोदेशः प्रतिमानमथास्त्रियाम् ।
गात्रं तु करिणः [7]पूर्वजङ्घाद्यवयवे न ना ॥१६८॥
अपरावरे तु पश्चाज्जङ्घाद्यवयवे न ना ।
आरालं पुच्छमूलस्योपान्ते स्यात्पेचकः पुमान् ॥१६९॥
पार्श्वतः पक्षभागः स्यात्पद्मार्थं बिन्दुजालकम् ।
मदयोगविधानं तु[8]व्यस्तारमथ तल्पनम् ॥१७०॥

---

१ इषार्थ B २ द्वीपिका B ३ का B ४ कुटे B ५ टं B ६ द्विन्दुः C ७ पूर्वं B
८ विस्तार B

*अक्षिकूटकं कुतः पुनरुक्तमिति नावगम्यते ।

पृष्ठवंशस्य यन्मांसं स्यादथो दन्तमांसके ।
क्लीबे[1]प्रवेष्टकं तत्स्यादथ तद्बन्धनेऽपि च ॥१७१॥
अन्दुकः पुंसि निगडो न स्त्रियां शृङ्खलं त्रिषु ।
पादपाशश्च[2]हिञ्जीरो न स्त्रियां गजबन्धभूः ॥१७२॥
वारिर्वारी च प्राची च [3]प्रारब्धिश्च स्त्रियामिमाः ।
गात्रबन्धेतु त्रिपदी चैकस्मिन्न[4]परेऽपि च ॥१७३॥
तोत्रं वेणुकमालानं निर्वाणं वैणुकं पुनः ।
नालिकाकर्णवेधिन्यामथस्यादङ्कुशोऽस्त्रियाम् ॥१७४॥
द्वयोः प्सृणिःशृणिरपि स्त्रियां स्यातां सृणी शृणी ।
अस्त्र्यष्ठत्वं कुशाग्रं घातमङ्कुशवारणम् ॥१७५॥
निषादिनां पादकर्म यातं वीतं नपुंसकम् ।
कच्या दूष्या वरत्रा स्या[5]दूषा चूष्या कुथ[6]स्त्रिषु ॥१७६॥
प्रवेणिः स्त्री प्रवेणी च परिस्तोमः पुमानयम् ।
वर्णः षणास्तरणं स्यात् कण्ठबन्धः कलापकः ॥१७७॥
पित्तज्वरः[7]पाकलोस्य कूटपूर्वस्त्रिदोषजः ।
नासापूर्वस्थूलहस्तं दन्तमूले करीरिका ॥१७८॥
शङ्खः कूटो दन्तमध्यं प्रोहश्चरणपर्वणि ।
[8]अपस्कारः प्रजङ्घाग्रे नाली[9]नात्रापरे नना ॥१७९॥

---

१ प्रवे इत्यक्षरद्वयं न C पुस्तके २ हिंसीरो B ३ प्ररब्धि B ४ ऽपरो B ५ दूष्या BC ६ स्त्रियाम् ७ ज्वरे B ८ अय B ९ नात्र B

अष्ठीवतोरधिष्ठाने संदानं पुंनपुंसकम् ।
विधानं गजभक्ष्ये स्यात् क्लीबे चैव विधा स्त्रियाम् ॥१८०॥
मेण्ठो मेठो निषादी स्यात् सादिः सादी निषाद्यपि ।
दृश्यते[1]पाण्डुरो यस्तु केशे रोम्णि च बालधौ ॥१८१॥
कर्णे च नेत्रयोश्चैव स स्यादैरावतान्वयः ।
अध्वक्षमः सारसदृक् क्षमी[2]बुद्धिविशारदः ॥१८२॥
[3]अजरोमा स्थूलशीर्षः पुण्डरीकान्वयो गजः ।
स्तब्धकर्णः सुदेहश्च कृष्णवर्णः कृशोदरः ॥१८३॥
स्थूलविन्दुर्धनु[4]र्वंशः पुष्पदन्तान्वयो गजः ।
अग्निवर्णः सुवर्णाक्षो वेगवाञ्जललम्पटः ॥१८४॥
आयतो विस्तृतोत्यर्थं वामनान्वयजः करी ।
प्रचण्डकुसुमच्छायः कपोतनयनः क्षमः ॥१८५॥
मेधावी तनुरोमा च सुप्रतीकान्वयोद्भवः ।
स्निग्धवालधिदन्तो यः श्वेतविन्दुकरान्वितः ॥१८६॥
पेचकेल्पः स्थूलकलः सार्वभौमान्वयो गजः ।
रौद्रो लघुशिराह्[6]स्वश्वेतविन्दुसमन्वितः ॥१८७॥
पाटलापुष्पनयनः स भवेदञ्जनान्वयः ।
कुम्भस्थूलतनुः स्निग्धलोललोहितलोचनः ॥१८८॥

---

१ पाण्डरोङ्गै[K] पाण्डुरोगै[B] २ युद्ध[B] ३ कुब्ज[B] ४ र्वप्राण्ड'[B] ८ ह्रस्व,..... स्तमश्रित:[KO]

कृष्णो[1] विस्तीर्णहस्ताग्रः कुञ्जरः कुमुदान्वयः ।
घोटोऽश्वस्तुरगो वीती किण्वी क्रान्तस्तुरंगमः ॥१८९॥
वाजी वाहस्तुरङ्गोर्वा गन्धर्वः सैन्धवो हयः ।
प्रकीर्णः क्रमणः प्रोथी कुरटः सिंहविक्रमः ॥१९०॥
स्यान्मुद्गमाषपर्यायाशनार्थश्चामरी च वाट् ।
अर्थात्पुत्रार्थकः पीतिः केसरी हंस इत्यपि ॥१९१॥
मरुद्रथो वासुदेवस्तार्क्ष्यो वातायनो हरिः ।
शालिहोत्रश्चैकशफो दधिक्रा एतशोऽप्यरुट् ॥१९२॥
वध्रः पतङ्गो हेषी स्यात्सुपर्णः श्येन इत्यपि ।
वीतिः सप्तिर्दधिक्रावा वातस्कन्धार्थ इत्यपि ॥१९३॥
स्थौर्यः पैद्वोऽव्यथिश्चापि[2] त्रिविधाः स्युरमी पुनः ।
श्रेष्ठमध्याधमाः सर्वे देशदेशसमुद्भवाः ॥१९४॥
अब्धिवाहीककम्बोजपारसीकवनायुजाः ।
सौराष्ट्रकोङ्कणोद्भूता आजानेयास्त उत्तमाः ॥१९५॥
तुरस्कारट्ट[3]कीरोरटक्कसिन्धुस्थलोद्भवाः ।
मध्यमाः प्राग्दक्षिण दिक्[4]सम्भवाः शाम्भला अपि १९६॥
सारस्वता अर्जलाश्च तङ्गणा अधमा अमी ।
वर्णैः शुक्लादिभिर्वर्णा ब्राह्मणाद्या यथाक्रमम् ॥१९७॥
मिश्रैर्मिश्रा विनीतस्तु साधुवाही जवाधिके ।
जवनो[5]थाश्वमेधीये ययुर्यायावरोऽपि च ॥१९८॥

---

१ कृष्टविस्तीर्ण B २ व्यधि B ३ कीरार B ४ शम्भलाः KC ५ ने KC

किशोरोऽल्पवयस्कोऽश्वो रथ्यो वोढा रथस्य यः ।
पृष्ठ्यः स्थूरी प्रसूरेषां वाम्यश्वा वडवार्वती ॥१९९॥
गणे तु वाडवं तासां दुर्विनीतस्तु सूकलः ।
कश्यः कशार्हो हृद्वक्रावर्त्ती श्रीवृक्षकी हयः ॥२००॥
पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ।
पुच्छोरःखुर[1]पुच्छास्यैः सितैः स्यादष्टमङ्गलः ॥२०१॥
सिते तु कर्कके्काह्वौ खांगाह्वः श्वेतपिङ्गले ।
पीयूषवर्णः सेराह्वः पीते तु[2]हरिमो हयः ॥२०२॥
[3]कृष्णवर्णस्तु खुङ्गाह्वः[4]कियाह्वो लोहितो हयः ।
आनीलो नीलकेपि स्यान्नियूह्वः कपिलो हयः ॥२०३॥
वोल्लार[5]श्चायमेव स्यात्पाण्डुकेशरवालधिः ।
उराहस्तु मनाक्पाण्डुः कृष्णवर्णो भवेद्यदि ॥२०४॥
सुरूहको गर्दभाभो[6]वोरुखानस्तु पाटलः ।
कुलाहस्तु मनाक्पीतः कृष्णः स्याद्यदिजानुनि ॥२०५॥
उकनाह्वः पीतरक्तच्छायः स एव तु क्वचित् ।
कृष्णरक्तच्छविः प्रोक्तः शोणः कोकनदच्छविः ॥२०६॥
हरितः पीतहरितच्छायः स्यात्स च हालकः ।
पुंगलः सितकाचाभो हलाहश्चित्रितो हयः ॥२०७॥

---

१ पुच्छा[KCB] पृष्ठा इति पाठस्तूचितः २ हरियो[BK] ३ कृष्णवर्णाद्दस्यारभ्य मनाक्पाण्डुरित्येतदन्तं[K] पुस्तके नास्ति ४ किंयाहो[B] ५ पिमे[C] ६ वोरू[KC]

प्रोथोऽस्त्री नासिकाश्वस्य कश्यं मध्यमथापि च ।
शफोऽस्त्रियां खुरः पुंसि पुटो[1]विङ्खोथ वालधिः ॥२०८॥
अस्त्री पुच्छस्तु लाङ्गूलं[2]क्लीबे लाङ्गुलमित्यपि ।
स्त्रियां क्लीबे च लङ्गूलं पुच्छमस्त्री लजः पुमान् ॥२०९॥
स्यात्पिच्छोपि च तत्रैव वालहस्तर्थकः[3]पुमान् ।
ललाम च ललामं च लूम[4]वालस्ततः पुनः ॥२१०॥
अपावृत्तपरावृत्तलुठितानि च वेल्लिते ।
न द्वयोरश्ववृन्दे स्यादाश्वमाश्वीयमित्यपि ॥२११॥
निगालस्तु गलोद्देशे हेषा ह्रेषा[5]श्वनिःस्वने ।
त्रिष्वाश्वी[6]यं यदश्वेन दिनेनैकेन गम्यते ॥२१२॥
ऊर्ध्वस्थितिस्त्रियामस्य स्यात्पुला च पुलायिता[7] ।
प्रक्षरः प्रखरोपि स्यात्संनाहोप[8]जनं परः ॥२१३॥
खलिनोऽस्त्री खलीनोपि कवियं षण् कविः कवी ।
पञ्चाङ्गी कर्षणी चापि मुखपर्यायन्त्रणा ॥२१४॥
नेत्रपट्टे मक्षि[9]कात्रं कवराक्षमथापि च ।
भूषणे मुखपट्टः स्यात्तलिका तलसारणम् ॥२१५॥
दामा[10]जनं पादपाशश्चर्मदण्डे कशास्त्रियाम् ।
पल्याणमपि पर्याणं बन्धे कक्ष्यास्य कक्षया[11]॥२१६॥

---

१ विखो^B २ क्लीबे इत्यारभ्य लङ्गूलमित्यन्तं^B पुस्तके नास्ति ३ पुनः^B ४ वाज^B
५ स्वनिः स्वनः^BC ६ यं^KC ७ पि^B ८ यं^B ९ कत्रं^B १० अनं^BK ११ पा^B

पदस्थाने[1]पादिके च पादाधारा[2]वथापि च ।
पु[3]च्छाटिका पुच्छबन्धे खुरत्राणं खुरोपरि ॥२१७॥
बन्धने स्यात् खुराधस्ताल्लोहे त्राणे तु[4]नालकः ।
तलत्रं स्याद्द्वयोरश्मिः क्लीबे प्रवपणं[5] स्त्रियाम् ॥२१८॥
कुशावक्षेपणी वल्गा क्लीबे धोरितवल्गिते ।
स्त्रियां प्लुतिरिमे क्लीबे तेजितोत्तेरिते पुनः ॥२१९॥
गतयः पञ्च धाराः स्युस्तुरगाणां क्रमादिमाः ।
तत्र धौरितकं धौर्यं धोरणं धोरितं च यत् ॥२२०॥
वभ्रुके शिखिकं क्रोडगतिवद्वल्गिते पुनः ।
अग्रच्छायसमुल्लासात्* कुञ्चिताग्रं नतत्रिकम् ॥२२१॥
प्लुतिस्तु लङ्घनं पक्षिमृगगत्यनुहारकम् ।
उत्तेजितं रेचितं स्यान्मध्यवेगेन या गतिः ॥२२२॥
उत्तेरित[6]मुपकण्ठमास्कन्दितकमित्यपि ।
उत्प्लुत्योत्प्लुत्य गमनं क्रोधादिवाखिलैः पदैः ॥२२३॥
अस्त्रियां वाहनं पत्रं यानं युग्यं च धोरणम् ।
परंपरावाहनं यत्तद्वैनीतकमस्त्रियाम् ॥२२४॥
अश्वारोहा अश्ववाहाः सादिनोऽथ निषङ्गिणः ।
भटा योधाश्च योद्धारः सेनारक्षाश्च ते पुनः ॥२२५॥

---

१ पद्दिके$^{B}$ २ व$^{BK}$ द$^{C}$ ३ पुच्छ$^{KC}$ ४ नालकाः$^{B}$ लालकाः$^{C}$-५ णं$^{KC}$
६ मुपकण्ठमित्यारभ्य त्तद्वैनीतकपर्य्यन्तं$^{K}$ पुस्तके नास्ति ।
* च्छायेतिपाठः सर्वेष्वादर्शेषु । कायेतिपाठः संभाव्यते ।

सेनान्तः परिधिः पुंसि स्यादारभट इत्यपि ।
ये सेनासमवेताः स्युः सैन्यास्ते सैनिका अपि ॥२२६॥
ये सहस्रेण बलिनः साहस्रास्ते सहस्रिणः ।
अथ च स्यात्कञ्चुकोऽस्त्री कवचो जगरः पुमान् ॥२२७॥
वारवाणोऽपि च क्लीबे तनुत्रं वर्म दंशनम् ।
सकञ्चुकैर्मध्यधार्ये क्लीबे सारसनं पुनः ॥२२८॥
शीर्षकं तु शिरस्त्राणं शीर्षण्यं च शिरस्त्रकम् ।
नागोदरमुरस्त्राणं जङ्घात्राणं तु [1]मत्कुणम् ॥२२९॥
नाहुलं च तदेव स्यान्नालिका चाङ्गरक्षिणी ।
त्रिष्वितो ध्वजिनीपूर्वा आमुक्तः प्रतिमुक्तवत् ॥२३०॥
संनद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ।
अपिनद्धः पिनद्धश्च दंशितश्चाप्यमी त्रिषु ॥२३१॥
दंशिताद्याश्चापि सत्त्वेप्यथ स्या[2]द्धर्मतागणे ।
अपि कावचिकं चाथ पद्गपत्तिपदातयः ॥२३२॥
पदातिकः[3] [4]पदगमः पदगः पदिकोपि च ।
पादातिगश्च [5]पादातः पादातिकपदाजयौ ॥२३३॥
पादातपदाजि[6]पायिक्यः शररातिरतः पुनः ।
पदाजिरथ[7]पादातं पत्तिपर्यायसंहृतिः ॥२३४॥

---

१ मंखुणम्[B] २ द्रूर्मता[B] ३ गः[KC] ४ पदा[KCB] पद[S] ५ पादातपादतिक-पदातयः[S] ६ पायिक्य[C] यायिभ्यः[B] ७ पादान्त[BKC] पादातम्[S]

शस्त्राजीव आयुधिककाण्डपृष्ठायुधीयकाः ।
काण्डपृष्ठसहाये तु प्रतिष्कशप्रतिष्कषौ ॥२३५॥
यो बहून्योधयेदेकः स महातिरथः पुनः ।
दूरापाती दूरवेधी लघुहस्तार्थ इत्यपि ॥२३६॥
कृतहस्तः सुप्रयुक्तो विशिखः शीघ्रवेध्यपि ।
कृतपुङ्खोथापराद्धपृषत्को लक्ष्यतश्च्युतः ॥२३७॥
धनुर्निषङ्गपर्यायमत्वर्थप्रत्ययी पुनः ।
धनुर्धरोथ काण्डीरः काण्डवाञ्छक्तिहेतिकः ॥२३८॥
शाक्तीक एवं याष्टीकः पारश्वधिक इत्यपि ।
नैस्त्रिंशकोऽसिहेतिः स्यात्प्रासिकः कौन्तिकोऽपि च ॥२३९॥
चर्मी फलकपाणिः स्यात् पताकी वैजयन्तिकः ।
अनुप्लवः सहायश्च चतुराभिचरौ समौ ॥२४०॥
अग्रेसरोग्रे भविता पुरोगो नायकोऽपि च ।
पुरोगमः पुरोगामी[1]स चैवाग्राग्रतः सरः ॥२४१॥
मन्थरो वेगगमनो जङ्घालस्त्वतिवेगिनि ।
जाङ्घिको जङ्घाकरिकस्तरस्वी त्वरितो जवी ॥२४२॥
जवनः प्रजवो वेगी[2]जङ्घिलो जाङ्घ इत्यपि ।
अन्वत्यन्तंभृशंकाममेभ्यो गामी क्रमादयम् ॥२४३॥

---

१ चैका[R] २ जङ्घीनो[B]

अत्यन्तीनोऽनुकामीनः कामंगामीन इत्ययम् ।
स्यादुरस्वानुरसिले जेयो जेतव्यमात्रके ॥२४४॥
जेतुं शक्यस्तु जय्यः स्याज्जेतुं शत्रुं प्रयाति यः ।
अभ्यमित्रोभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि ॥२४५॥
ऊर्जस्व्यूर्जस्वलोत्यन्तबलपर्यायवत्यपि ।
विक्रान्तो जित्वरो जेता शूरो वीरश्च जिष्णुकः ॥२४६॥
संयुगे सर्वतः साधुः सांयुगीनः स्मृतश्च सः ।
रथस्वामी तु रथिको रथिनो रथिरो रथी ॥२४७॥
अथ सेना तु पृतना[1]वाहिनी वाहना चमूः ।
वरूथिनी च ध्वजिनी बलं सैन्यं च गुल्मिनी ॥२४८॥
अस्त्रियां कटकं चक्रमनीकं च चमुस्त्रियाम् ।
गलोर्गलः कुटः कोटः[2]कोटो दुर्गश्च पुंस्यमी ॥२४९॥
[3]पत्तिरेकरथैकेभा त्र्यश्वा स्यात्पञ्चपद्गमा ।
इतः स्युस्त्रिगुणैरङ्गैर्यथोत्तरमनुक्रमात् ॥२५०॥
क्लीबे सेनामुखं गुल्मोऽस्त्रियामपि गणः[4]पुमान् ।
वाहिनी पृतना चापि चमूः पुनरनीकिनी ॥२५१॥
अपीयं दशभिर्निघ्ना सेनार्थाक्षौहिणीति सा ।
(१३७१२४६०)
खनन्दजिनचन्द्राश्वगुणभूमिमिता रथाः ॥२५२॥

---

१ नीकिनी वाहिनि इति पाठः स्यात् २ कोठो$^{K}$ ३ पित्ति $^{B}$ ४ क्रमात्$^{B}$

(४११२७४७०)
[1]गजाश्व खाश्ववेदाश्वरविचन्द्राब्धिभिः क्रमात् ।
(८५६२४५०)
सादिनः खशराब्ध्यग्नितर्केषु वसु[2]षगिमताः ॥२५३॥
पत्तयो यत्र सा प्रोक्ता महाक्षौहिणिका बुधैः ।
व्यूहस्तु बलविन्यासो भेदा दण्डादयो युधि ॥२५४॥
प्रत्यासारो द्वयोः पार्ष्णिः सैन्यपृष्ठं प्रतिग्रहः ।
प्रतिग्रहोऽपि पुंसि स्यात्पार्ष्णी प्रत्यासरोऽपि च ॥२५५॥
मुखे रथा हयाः पृष्ठे तत्पृष्ठे च पदातयः ।
पार्श्वयोश्च गजाः कार्या[3]व्यूहोऽयं परिकीर्तितः ॥२५६॥
संपत्तिः संपदा संपल्लक्ष्मीः श्रीर्विपदा विपत् ।
विपत्तिरापद्दुःखार्था न द्वयोरायुधं पुनः ॥२५७॥
अस्त्रं शस्त्रं प्रहरणं हेतिर्वा नाथ तत्त्रिधा ।
पाणियन्त्रादिना मुक्तं तच्च शक्तिशरादिकम् ॥२५८॥
अमुक्तं शस्त्रि[4]कादिस्याद्यष्ट्याद्यंतु द्वयात्मकम् ।
अवलम्बः पुमान्दण्डो यष्टिश्च तरणिर्द्वयोः ॥२५९॥
मन्त्रप्रयोगजं शस्त्रमथ धन्व तु कार्मुकम् ।
शरासनं च कोदण्डं[5]सरासनममूनिषण् ॥२६०॥
स्यादस्त्रियां धनुः[6]षान्तं [7]धनुः पुंसि धनूः स्त्रियाम् ।
तृणता त्रिणता चापो[8]न स्त्री गाण्डीवगाण्डिवौ ॥२६१॥

---

१ बाजाश्व[B] २ संमिताः[B] ३ भ्यूहो[B] ४ का इत्येकमक्षरं [C] पुस्तके नास्ति
५ शरासन[KC] ६ सान्त[B] ७ धनूः[KC] ८ चापो[KC]

द्रुणासेष्वासगुणतः पुं क्लीबे त्वव्यधं[1] पुनः ।
प्रतिकायः पुमानस्याग्रगते कोटिरित्यपि ॥२६२॥
अटनी धनुषो मध्ये लस्तको ना गुणालयः ।
मौर्वी ज्या सिञ्जिनी जीवा न ना गव्या[2]गुणो द्वयोः ॥२६३॥
पतञ्जिका गुणा[3]सिञ्जा क्लीबे वाणासनं गुणः ।
गोधा स्त्रियां तलं क्लीबे सैव स्याद्बाहुपट्टिका ॥२६४॥
[4]क्लीबे लक्षं शरव्यं स्याल्लक्ष्यं वेध्यमुपासनम् ।
शराभ्यासः श्रमो योग्या खल्लूरी खुरलीति च ॥२६५॥
खल्लूरिका तु[5] तद्भूभिरवष्टम्भश्च सौष्ठवम् ।
[6]युग्या[7]गुणनिका ग्राह्या काण्डोऽस्त्री विशिखः पुमान् ।२६६।
सायकोऽजिह्मगो बाणः पृषत्कोपि शिलीमुखः ।
कलम्बो मार्गणो रोपः पत्री स्यात्खग आशुगः ॥२६७॥
स्याद्वार्द्ध[8] कङ्कयोः पत्रो वाजः प्रदर इत्यपि ।
स्थूलदण्डो[9]विपाटः स्याद[10]स्त्रार्थात्कण्टकार्थकः ॥२६८॥
विकर्षः पत्रवाहश्च चित्रपुङ्खः शरः[11]खरुः ।
[12]सरः शरुर्मर्मभेदी वीरशङ्कुश्च लक्षहा ॥२६९॥
[13]कदम्बसायकादम्बा वाजी च स्यादिषुर्द्वयोः ।
प्रक्ष्वेडनो ना नाराचोप्यस्त्रं षण् सायकः पुमान् ॥२७०॥

---

१ स्भ्य[B] २ गुणा[C] ३ सिञ्ञा[B] ४ क्लीबेइत्यादिश्लोकः[K] पुस्तके नास्ति । ५ पि[B] ६ पुण्या[C] ७ गुणनिकांत्याद्या[B] ८ द्वारः[KC] ९ विपाठः[BK] १० दस्ता[KC] ११ स्वरुः[B] १२ शरोमरुः[B] १३ कदम्बःसायः कादम्बो[KC]

स्त्रियां[1]भल्लिश्च भल्ली च भल्लोऽपि स्यात्पुमानयम् ।
सर्वलोहे लोहताल:[2] प्रसरः काण्डगोचरः ॥२७१॥
निरस्तः प्रहिते वाणे तीरी[3]विजुलसायके ।
नालीका नलिकाक्षेप्याः कर्णिनो रुरुशीर्षकाः ॥२७२॥
स्त्रियां पुंसि विषाक्ते तु दिग्धो लिप्तो[4]ऽक्त इत्यपि ।
हस्तावापो हस्तमुष्टिग्राह्यवाणगणे पुमान् ॥२७३॥
शरमुष्टिः [5]पुच्छ[6]शीर्ष द्विफली पुंसि पुङ्खकः ।
बाणमुक्तिर्व्यवच्छेदो दीप्तिर्वेगस्य तीव्रता ॥२७४॥
खुरप्रोपि क्षुरप्रः स्यादर्द्धेन्दुप्रमुखा भिदाः ।
अप्यञ्जलिक इत्याद्या वाजः पत्तश्च पिच्छकः ॥२७५॥
प्रत्यालीढं तथालीढं विशाखं मण्डलं पुनः ।
वैकृतं दर्दुरं चैव[7]दश स्थानानि धन्विनाम् ॥२७६॥
शतघ्नी तु चतुस्ताला लोहकण्टकसंचिता ।
अयःशङ्कुरसंछिन्ना [8]शतघ्न्येव महाफला[10] ॥२७७॥
भुशुण्डी स्याद्दारुमयी वृत्तायः[11]कीलसंचिता ।
अपि गोलासनं क्लीबे बद्धोल्का नालिका स्त्रियाम् ॥२७८॥
उत्सृष्टा गोलकाः पुंसि कणयो लोहयन्त्रके ।
शरपर्यायोश्रयधिर्द्वयोः स्यादिषुधी स्त्रियाम् ॥२७९॥

---

१ भिाल्लकवभिल्ली च[B] २ लोहतलः[B] लोह नाला[C] ३ विज्जल[BK] ४ तु लिप्तकः[K] ५ पिच्छ[BK] ६ शीर्षे द्विकाले[CK] ७ स्थानान्येतानि[B] ८ अयः संकरसञ्छिन्ना[BK] ९ कला[B] १० फाल

[1]तूणी तूणा च तूणीर उपासङ्गो निषङ्गकः ।
चन्द्रहासस्त्वसिः पुंसि प्रवालः सायकोऽपि च ॥२८०॥
रिष्टिर्ऋ ष्टिर्द्वयोः खड्गः पुंसि कौक्षेयकोऽपि च ।
भद्रासनो मण्डलाग्रः करवालः कृपाणवत् ॥२८१॥
तरवारिर्द्वयोश्चापि निस्त्रिंशः करपालकः ।
क्लीबे शस्त्रं विशसनो धर्मपालः प्रजाकरः ॥२८२॥
तीक्ष्ण[2]धारोधरो देवो व्यवहारो दुरासहः ।
प्रसङ्गी[3]रुद्रतनयः[4]शस्त्रो विजय इत्यपि ॥२८३॥
शिवंकरो मनुज्येष्ठः करालो च विशाग्रजः ।
गाढमुष्टिस्तीव्रमार्गः पुष्करी कोशवानपि ॥२८४॥
धाराधरो लोहसर्पो जयश्रीर्जगतोऽपि च ।
धर्मप्रचारो धाराङ्गः स्याद्धाराविष इत्यपि ॥२८५॥
पञ्चाशताङ्गुलैर्मुख्यः पञ्चविंशतिको परः ।
अनयोर्मध्यमानेन मध्यमः खड्ग उच्यते ॥२८६॥
अव्रणो योगरोपेतस्तिर्यग्भेदविवर्जितः ।
व्रणयुक्तोऽपि निस्त्रिंशो बिल्वकुण्डलपञ्जरैः ॥२८७॥
वर्द्धमानध्वजच्छत्रस्वस्तिकैश्च व्रणैः शुभः ।
मानहीनो विभिन्नश्च कुञ्चितो ध्वनिवर्जितः ॥२८८॥

१ तूणी इत्यक्षरद्वयं[K] पुस्तके नास्ति २ धाराधरो[B] ३ रूढ[C] ४ शास्त्रविजय[B]

नेत्र[1]चित्तविरोधी च वर्जनीयो दुरा[2]सहः ।
असिर्मरकतश्यामो योगरैः परिवर्जितः ॥२८९॥
बाणबाहुवनच्छेदी[3]बाणो यः शार्ङ्गिणा धृतः ।
कृपाणः शाद्वलश्याम[4]स्तबकी दीर्घयोगरः ॥२९०॥
अच्छेद्यो रोहिणीवाहः पौलस्त्येन धृतः पुरा ।
कुटिलैर्योगरैर्युक्तो वरकेसरसंनिभैः ॥२९१॥
मत्कुणः करवालोऽयं लोहवर्णेन वर्ण्यते ।
गोजिह्वापल्लवप्रख्यो योगरो यत्र दृश्यते ॥२९२॥
असिर्निरवह्नो नाम द्विषच्छेदकरः[5]परः ।
तरुणीकेशसंकाशः सूक्ष्मपाण्डुरयोगरः ॥२९३॥
सान्द्राङ्कः करवालोऽयं भद्रकालीकरस्थितः ।
राजजम्बूफलश्यामो वक्रपाण्डुरयोगरः ॥२९४॥
स्निग्धच्छायवपुः खड्गो वंगिवालोऽभिधीयते ।
असिः प्रत्यग्रजीमूतसकलश्यामलच्छविः ॥२९५॥
पाठीनत्वक्समाकारयोगरो य सुवालकः ।
केकिचन्द्रकसंकाशैर्योगरैर्निविडैः श्रितः ॥२९६॥
केवेल्लक इति ख्यातः[6]खड्गः खड्गभृतां मतः ।
तमालव्यालरोलम्बनिकुरम्बसमच्छविः ॥२९७॥

---

१ चित्र B २ सद्दः K ३ बाणाय: K ४ स्तवदीर्घं K ५ शुभः B ६ केवेल्ल इति विख्यातः B

कौक्षेयकः स [1]भीताक्षः पुरुषाकारयोगरः ।
एरण्डबीजसंकाशयोगर[2]स्तार[3]पट्टकः ॥२९८॥
रामारोमावलीश्यामो न नमेन्नामितोप्यसिः ।
नववारिधरश्यामः पिङ्गाकुञ्चितयोगरः ॥२९९॥
खड्गः षडालको नाम विषवज्रभयापहः ।
स्वर्णचूर्णनिभैः सूक्ष्मैर्योगरैः [4]स्वर्णपञ्जरः[5] ॥३००॥
मुक्ताचूर्णसमाकारैः ख्यातस्तित्तिरवल्लरः ।
योगरैः [6]कज्जलप्रख्यैः खड्गः स्यात् कालवल्लरः ॥३०१॥
वियच्छ्यामवपुः सारः स्वल्पपाण्डरयोगरः ।
सरोजिनीदलच्छायः[7]कोङ्गिः खड्गोऽभिधीयते ॥३०२॥
कदली शृङ्खली चापि यस्मिन्दृश्येत चान्तरा[8] ।
वर्णयोगरभेदेन नामान्येषां भवन्ति हि ॥३०३॥
कटीतलो न्युब्जखड्ग एकधार इली स्त्रियाम् ।
इलालिः करपालिः स्यादिलीलिरपि वा पुनः ॥३०४॥
करवाल्यथ मुष्टी स्त्री द्वयोर्मुष्टि[9]ग्रहस्थले ।
त्सरुश्च पुंसि ग्राह्योपि प्रत्याकारस्तु पुंसि च ॥३०५॥
दन्तेन निर्मितस्तत्र दन्तपालिरसेस्तु यत् ।
तिर्यग्भागद्वयं मुष्टावधोग्रान्तं नपुंसकम् ॥३०६॥

---

१ भीताख्यः २ स्तोरकः K ३ पट्टिकः B ४ स्वर्णपञ्जरैः B स्वर्णपिञ्जरैरिति पाठो भवेत् ५ अत्र पद्भ्यां पदोर्यद्धरणं पादबन्धः स उच्यते इत्यधिकं B पुस्तके दृश्यते तच्चो-परिष्टान्नियुद्धभेदप्रकरणे C पुस्तके समुपलभ्यते तत्रैव चैतत्पाठः समुचितः K पुस्तकेत्वे-तच्छ्लोकार्द्धं न क्वाप्युपलभ्यते ६ कल्पल B ७ कोगिः B ८ तरान्तरा KC ९ गृंह KC

भवेद्गृञ्जनकं तस्मादधस्ता[1]द्धण्डिका स्त्रियाम् ।
अत्रिका तदधस्तिर्यग्भागद्वितयमस्य तु ॥३०७॥
मध्यभागस्ताडिका स्त्री शूकभागोग्रमप्यसेः ।
योगरस्तु गुणोत्कर्षे[2]खड्गाद्यश्चास्य कीर्त्तितः ॥३०८॥
परिवारः परीवारः कोशः कोषो नपुंसकम् ।
खड्गपर्यायसञ्ज्ञा[3]र्थेपिधानार्थकमित्यपि ॥३०९॥
प्रत्यग्रकोशः स्याद्घातोः[4] खड्गाग्राघातवारणे ।
खड्गस्य कटिबन्धार्थी[5] वेधा स्त्री मेखलापटः ॥३१०॥
फलकोऽस्त्री फलं[6]फाटं खेटं क्लीबे[7]स्फुटं पुनः ।
अद्भुतावरणे चर्म[8]दके संग्राहकोस्य तु ॥३११॥
मुष्टावथ कृपाणी तु[9]षुरी शस्त्री छुरीति च ।
[10]स्यातामसेर्द्धेनुपुत्र्यौ सैव स्यात्कोशशायिका ॥३१२॥
पत्रतो धेनुकाथ स्यात्पत्र[11]पालस्तु सायता ।
भिन्दिपाले सृगः पुंसि[12]कुट्टन्ती [13]कुलमातृका* ॥३१३॥
अपि पत्रलता सा स्याद्दण्डोऽस्त्री लगुडः पुमान् ।
यष्टिर्द्वयोः स्त्रियां यष्टी काण्डोऽप्यस्त्री ततः पुनः ॥३१४॥

---

१ दधस्ताधंडिका B २ खड्गाधश्चास्य B ३ र्थं B ४ द्रवःखड्गा B ५ बन्धार्थी इति B पुस्तके वारद्वयं दृश्यते ६ फाटं K काण्डं B ७ स्फुटं BK स्फटं BC ८ देके B ९ छुरी B १० स्यातामसेरित्यादिततः पुनरित्यन्तं सार्द्धश्लोकद्वयं K पुस्तके नोपलभ्यते ११ फाल B १२ कुट्टती १३ हुलमातृकेत्यभिधानान्तरेषु पाठः कुलमातृकेति सर्वेषु कल्पद्रुपुस्तकेषु ।

*फलपत्राग्रके हुलमिति हुलशब्दस्यार्थोऽग्रे दृश्यते ।

शक्ती स्त्रियां तथा शक्तिरमृतापि महाफला ।
कासूः खुरोत्तमस्तु स्यात्पट्टिशः पटिसोऽपि च ॥३१५॥
पालिरस्त्री कोटिरेता दीर्घान्ताः स्युः स्त्रियामिमाः ।
कुला[1]ग्रका तु चिरिका फलपत्राग्रके हुलम् ॥३१६॥
वराहकर्णोन्वर्थः स्याद्दुः[2]स्फोटस्तीक्ष्णधारकः ।
आरा[3]करो लोहदण्डश्चक्रं तु वलयाकृति ॥३१७॥
क्लीबे[4]सुसंचितमपि मुद्गरो द्रुघणो घनः ।
द्रुघनोऽपि च कुन्ते तु प्रासः प्राशः शलोऽपि च ॥३१८॥
शल्यमस्त्री पुंसि शङ्कुस्तत्र दीर्घायुधं पुनः ।
द्वयोः कुठारः परशुः पर्शुः परश्वधोऽपि च ॥३१९॥
परस्वधश्च स्वधितिष्टङ्कोपि पशर्वधः कुठः ।
सर्वला शर्वलापि स्त्री सर्वली शर्वलीत्यपि ॥३२०॥
अस्त्रियां तोमरोथ स्यात्परिघः परि[5]पालनः ।
सर्वलोहमयं त्र्यग्रं[6]त्रिशूलं तु त्रि[7]शीर्षकम् ॥३२१॥
धनुः खड्गो गदाचक्रवज्रखट्वाङ्गतोमराः ।
यमदंष्ट्रा क्षुरीमूलं कर्त्तरी मुद्गरो हलम् ॥३२२॥
पाशोङ्कुशो भिन्दिपालः कणपः पट्टिशस्ततः ।
भुशुण्डी शङ्खमुसल[8]स्तरुगोफणपत्रणाः ॥३२३॥

---

१ ग्रला B हुलाग्रकेति शुद्धं प्रतिभाति २ दुःस्फोट KC ३ कलो K कालो B
४ समंचित B ५ पातः B ६ त्रिशलं KC ७ शीघ्रकम् B ८ स्तरूण C

दुःस्फोटमक्षिकाडाहूडभसाः करपत्रकः ।
हुलिः कुठारः परिघः कुन्तिः शक्तिश्च कर्त्तरी ॥३२४॥
यष्टिः शस्त्राणि षट्त्रिंशदमून्यायोधजीविनाम् ।
घाणिटको घणिटकः कोणः स्यादश्रोऽस्त्रश्च पुंस्यमी ॥३२५॥
सर्वाभिसारः सर्वाभीसारोभी[1] राजनात्परः ।
स च स्यात्सर्वसंनाहोऽभिसारोभिसरोऽपि च ॥३२६॥
दशम्यां यो विधिर्भूपे स च लोहाभिसारकः ।
यत्सेनयाभिगमनमरौ तदभिषेणनम् ॥३२७॥
यात्रा वज्याभिनिर्याणं प्रयाणं गमनं गमः ।
प्रस्थानं च प्रसरणं ननासारः प्रचक्रकम् ॥३२८॥
अभिक्रमे रणे यानमभीतस्य रिपुं प्रति ।
अभ्यमित्र्योऽभ्यमित्रीयोऽभ्यमित्रीणोभ्यरिं वजन् ३१५॥
स्यात्सुहृद्बलमासारः प्रचक्रं चलितं बलम् ।
प्रसारस्तु प्रसरणं तृणकाष्ठादिहेतवे ॥३३०॥
वैतालिका बोधकराः प्रातर्गे[2]याः स्तुतिवताः ।
आर्थिकाः सौखसुप्त्यर्था घाणिटकाश्चाक्रिकाः समाः ।३३१॥
मागधा मगधास्ते स्युर्वन्दिनः स्तुतिपाठकाः ।
वैतालिकाद्या नग्नाः [3]स्युर्नग्नाचार्यस्तु हिण्डकः ॥३३२॥

---

१ नी B २ यास्तु B ३ नांनावीर्यास्तु B

भोगावली [1]वन्दिपाठो वसुकीटस्तु याचकः ।
संसप्तकास्तु समये समरादनिवर्त्तिनः ॥३३३॥
संशप्तका अथ रजः क्षोदः सान्ते उभे च षण् ।
रेणुस्त्रिषु रजः क्लीबे धूलिर्धूली स्त्रियामुभे ॥३३४॥
पुंसि पांसुश्च पांशुश्च वातकेतुः क्षितेः कणः ।
अस्त्री तूस्तमपि [2]क्षोदश्चूर्णः सर्वत्र चूर्णिते ॥३३५॥
संभारः पिञ्जलस्तु स्यात्समुत्पिञ्जो भृशाकुले ।
महासमरतूर्येऽस्त्री पटहाडम्बरौ समौ ॥३३६॥
ध्वजोऽस्त्री केतनं चापि क्लीबे केतुः पुमान् स्त्रियाम् ।
वैजयन्ती जयन्ती च पताका व्योममञ्जरी ॥३३७॥
कन्दल्यपि स्यात्कदली ककुत्स्त्री ककुदोऽस्त्रियाम् ।
विहिते पत्रवस्त्रादौ मीने चीनोऽस्त्रियामयम् ॥३३८॥
एषां वस्त्रे कोणभेदात् पताकाध्वजकेतवः ।
अस्योच्चूडावचूडाख्यावूर्ध्वाधोमुखकूर्चके ॥३३९॥
अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ।
एवं चाहंप्रथमिका तथाहंश्रेष्ठिकापि च ॥३४०॥
दर्पादात्मनि या श्लाघा साहंपुरुषिका स्त्रियाम् ।
परस्परं योहंकारः सोहमहमिका स्त्रियाम् ॥३४१॥

---

१ वन्दिपागे B २ वर्णः BK

दण्डैर्दण्डैर्यन्द्भटानां वृत्तं युद्धमनुत्तमम् ।
दण्डादण्डि तदेवं स्यात्केशाकेशि नखानखि ॥३४२॥
मुष्टिभिर्मुष्टिभिर्युद्धं यद्वृत्त[1]मुष्टीमुष्टि तत् ।
शक्त्यृष्टिमुष्टियुक्तीनां गालिबाहूरुजानुनाम् ॥३४३॥
उन्नेयमेवं क्रमशो वृत्ते भाविनि वारणे ।
पराक्रमातिशायित्वहेतवे क्रियते भटैः ॥३४४॥
पानं यत्तद्वीरपाणमोजः पुंसि सहोऽस्त्रियाम् ।
सान्तमोजः सहः क्लीबे क्लीबे[2]सुष्मं च शुष्म च ॥३४५॥
मृधमास्कन्दनं संख्यं समीकं साम्परायिकम् ।
जन्यं पुमान् सम्प्रहारो नदनुः कलहो रणः ॥३४६॥
समाघातोभिसंपातः संस्कारो दुर्दरः कलिः ।
[3]अत्यामर्दश्च संमर्दो विमर्दः संयुगोऽस्त्रियाम् ॥३४७॥
द्वयो राजिश्च समितिः[4]संयद्राढिः समित्पुनः ।
अस्त्रियां समरं चापि[5] जन्यमाहरणं मृधम् ॥३४८॥
द्वन्द्वमास्कन्दनं पुंसि संगरश्च समाह्वयः ।
युदाहवश्च संघातः समुदायोऽपि विग्रहः ॥३४९॥
प्रघातोभ्यागमश्चापि[6]नन्दनुः संप्रहारकः ।
समर्यो भर आक्रन्दः पृतनाज्यौ स्त्रियां पुनः ॥३५०॥

---

१ मुष्टिमुष्टि B २ शुष्मन् B युष्मन् KC ३ अभ्या B ४ संयुद्राटिः B ५ जन्यं पूर्वमपि दृश्यते । जत्थं B ६ नदतुः K नन्दनः B

नियुद्धं बाहुयुद्धे स्यात्तस्य भेदा अमी मताः ।
मिथः कर[1]ग्रहे योद्धोः प्रसृष्टा स्यात्स्त्रियामियम् ॥३५१॥
द्विगुणीकृतदोर्मध्ये ग्रीवाकर्षोऽपि कण्टकः ।
अवधूतं तु पादेन प्रेरणं यच्च वक्षसः ॥३५२॥
शलाकयाङ्गुलीच्छिन्ना नखयष्टिर्हि सा मता ।
[2]पद्भ्यां पदोर्यद्धरणं पादबन्धः स उच्यते ॥३५३॥
दोर्द्वयाकर्षणं कीलः प्रकोष्ठहननं तु यत् ।
स वज्रपातोऽथ पुनस्तुमुलं संकुलं रणम् ॥३५४॥
क्ष्वेडा स्त्री सिंहनादो ना क्ष्वेडितं पुंनपुंसकम् ।
नासीरं त्वग्रयानं स्यादवमर्दस्तु पीडनम् ॥३५५॥
उत्पिञ्जलः काहलश्च हल्लोलस्तत्र लोलता ।
तत्राव्यक्तो रवो[3] रोलो हलः कोला हलः पुनः ॥३५६॥
प्रविदारश्च संग्रामो विदारः प्रविदारणम् ।
[4]संस्फेटश्चापि [5]संपानोऽनीकः संफेट इत्यपि ॥३५७॥
संपरावः समुदयः[6] संस्फोटः कलहोऽस्त्रियाम् ।
स्त्रियामाजी च[7]समितिः स्यात् क्लीबे सांपरा[8]यिकम् ॥३५८॥
आयोधनं च प्रधनं युद्धं संयत् स्त्रियां नरि ।
क्रन्दनं रोदनं रावो बृंहितं करिगर्जितम् ॥३५९॥

---

१ ग्रहो BK २ पद्भ्यामिति K पुस्तके नास्ति ३ रोलः वोलः KC ४ संस्फे KC
५ भिसंपातो BK ६ दायः C ७ समिती B ८ यकम् B

विस्फारो धनुषः स्वाने[1] विष्फारोऽपि निगद्यते ।
प्रसभं तु बलात्कारे छलितं तु छलं च षण् ॥३६०॥
अजन्यमस्त्री चोत्पात उपसर्गोऽथ कश्मलम् ।
मूर्छा मोहोथ विजयोऽभ्यवस्कन्दनमित्यपि ॥३६१॥
जयोऽभ्यासादनं च स्यादप्यथो वैरशोधनम् ।
वैर[2]शुद्धिः प्रतीकारः प्रतिकारस्ततः पुनः ॥३६२॥
विसंप्रोद्भयो द्रवद्रावौ वैरनिर्यातनं च षण् ।
स्त्री[3]शृगाल्यपयानं[4]षण् पलायनमपक्रमः ॥३६३॥
पराजयो रणे भङ्गो हारिर्हारी स्त्रियामिमे ।
कच्चास्पर्द्धा प्रतिस्पर्द्धा डम्बरे डिम्बविप्लवौ ॥३६४॥
परापर्यभितो भूतो गतो भग्नः पलायितः ।
पराजितेऽपि नष्टः स्याद् गृहीतदिक् तिरोहितः ॥३६५॥
कांदिशीको भयत्रस्तोऽप्यथ भेलस्तु कातरः ।
[5]पलंकटश्च हरिणपर्यायहृदयार्थकः ॥३६६॥
अधीरः कातरो भीरुर्भीलुश्चकित इत्यपि ।
[6]दरितश्चकिलो भीतस्त्रस्तस्त्रसित इत्यथ ॥३६७॥
जिताहवो जितकाशी पराभूते पराजितः ।
विजितो निर्जितश्चाथ प्रस्कन्नपतितौ त्रिषु ॥३६८॥

---

१ विषारो KC २ शुद्धि B ३ शृङ्गा B ४ स्यात् B ५ पतंकटश्च B ६ दरितः शङ्कितो B

कर्त्त[1]प्रमाथ संतापनिवापच्छेदसंज्ञयाः ।
कदव्यापाद[2]।निर्ग्रन्थनिस्तर्हविशसा अपि ॥३६६॥
वर्द्धप्रमाप[3]प्रमथ[4]प्रवासप्रशमत्तणाः ।
पुत्रश्च कल्पनिर्यातनिषूदप्रमथास्ततः ॥३७०॥
अपासोद्वास[5] निर्वापा नमेभ्यः क्राथमारकौ ।
हिंसानिशुम्भः संज्ञप्तिरालम्भः परिवर्जनम् ॥३७१॥
विसारश्चापि विसरनिकार[6]निवहा अपि ।
तद्वन्निस्तर्हनिर्वापविकारेभ्यो णमित्यपि* ॥३७२॥
वधोविनिभ्यां वापः स्याद्विसरः प्रतिघातनम् ।
निवाहोऽपि स्त्रियां मारिः सर्वगो मरको स्त्रियाम् ॥३७३॥
अपि स्यात्तद्वत्प्रलयो दिष्टान्तोऽप्यत्ययोऽपि च ।
नाशः स्त्रियां पञ्चता स्यान्निधनं षण्ढयोः पुनः ॥३७४॥
बहुभिः प्रबले शत्रौ प्रमत्ते सति हिंसनम् ।
[7]धाटी तु [8]धातकं डाकश्चौराणामभिसारके ॥३७५॥
स्त्रियां[9]लुण्ठा च लुण्ठिश्च लूषिलूषी च[10]लुण्ठनम् ।
भूमिपर्यायलाभार्थः सौप्तिकं रात्रिमारणम् ॥३७६॥

---

१ प्रथम B २।निग्रन्थ B ३ प्रथम B ४ विवासप्रशास B ५ आयासोद्वा B
६ निर्वहा B निवाहौ B ७ धारी B घटी B ८ घाटकं KB ९ लुण्टाच लुण्टिश्च लूपि B
१० लुण्टनम् K

* विस्तर्हयां, निवापयां, वि (नि ?) कारयां चेत्यर्थः ।

विशरणं मारणं हिंसा दिष्टान्तः प्रलयो वधः ।
स्यादाक्रन्दः पिञ्जरम्भौ प्रतिघः परिघः पुनः ॥३७७॥
परिसमाविसंभ्योऽपि घातो [1]घातस्ततः पुनः ।
संग्रामभयदा भूमिर्वीरा[2]शंसनमित्यपि ॥३७८॥
उत्क्रान्त्यवस्थो मठर उपधूपित इत्यपि ।
म्रियमाणस्य यः श्वासः स हराहर उच्यते ॥३७९॥
परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।
अपि प्रमीतस्त्रिष्वेते[3]चित्यचैत्ये तु न द्वयोः ॥३८०॥
चितिः खाटिश्चिता चित्या स्त्रियां ना चूडकः कटः ।
शिरोहीने कबन्धोऽस्त्री रुण्डो देहे क्रियान्विते ॥३८१॥
स्यात् श्मशानं पितृवनं[4] वीरभूः करवीरकम् ।
अन्तपर्यायशय्यार्थपर्यायं च शतानकम् ॥३८२॥
रुद्रपर्याय आक्रीडे संस्क्रियासत्क्रिये समे ।
[5]शवपर्यायवेश्मार्थं[6]दाहतः सरसोऽर्थकः ॥३८३॥
स्त्रियां स्यादुपकार्याथ कुणपः क्षितिवर्द्धनः ।
पञ्चावस्थः कटस्थालं शवोऽस्त्री प्रग्रहोऽपि च ॥३८४॥
उपग्रहः[7]करमरी ग्राहो वन्दो च बन्धने ।
प्राणोऽसुरसवः प्राणाः पुंसि भूम्न्येकभाषणे ॥३८५॥

---

१ घात K २ संशन KC ३ चित्यश्चैत्यं B ४ वीरभः B ५ शर BK ६ दहितः B
७ कंमरी B

पुरुषायुषकं यावदायुः स्याद्‌द्विगुणं ततः ।
द्व्यायुषं त्रिगुणं तद्वत्त्र्यायुषं च तिरायुषम् ॥३८६॥
जीवोऽसुधारणं चाथ क्लीबे द्वे आयुरायुषी ।
[1]पुंसि जीवितकालः स्याज्जीवातुर्जीवनौषधम् ॥३८७॥
कल्पद्रौ केशवकृते फलिते नामभिः किल ।
भूमिस्कन्धे क्षत्रकाण्डः पञ्चमः सिद्धिमागतः ॥३८८॥

इति क्षत्रिय[2]प्रकाण्डः ।

---

विशो भूमिस्पृशो वैश्या ऊरुपर्यायजार्थकाः ।
अर्या उरव्या[3]गोरक्षाकृषिवाणिज्यजीविनः ॥१॥
स्त्रियां कृषिः स्याद्वाणिज्या न ना सत्यानृतं पुनः ।
तृष्णा धनपिशाची स्याद्वार[4]उद्धारमस्त्रियाम् ॥२॥
ऋणं[5]प्रमात्यं क्लीबे थ कुसीदं वृद्धिजीविका ।
*कुमुदो वाच्यलिङ्गः स्यात् कुमुदं च नपुंसकम् ॥३॥

---

१ आयुर्जीवित B २ क्षत्रियकाण्डः B ३ गोरक्षाः BO ४ वद्धार K ५ प्रमात्यं B

* कुमुदो वाच्यलिङ्गः स्यात् कुमुदं चेति पाठः स्यात् ।

[१]फलाम्लिकार्थप्रयोगे याच्चाप्राप्तं तु याचितम् ।
[२]यत्प्राप्तं नित्यमादापमित्यकं तदितस्त्रिषु ॥४॥
[३]आवप्रादुत्तमर्णस्तु प्रयोक्ताथ ग्रहीतरि ।
अधमर्णः कुसीदी तु वृद्ध्याजीवश्च वार्धुषः ॥५॥
कुसीदको वृद्धिपरः स्याद्द्वैगुणिक इत्यपि ।
मूल्यं क्लीबेऽस्त्रियां वस्नः पुमानर्घ[४] क्रयोऽपि च ॥६॥
अवक्रयो भाटकोऽस्त्री द्रव्यवृद्धौ कला स्त्रियाम् ।
मध्यस्थः प्राश्निकः साक्षी स्थेयोथो[५]कूटसाक्षिणि ॥७॥
मिथ्यापर्यायसाक्षी स्यादसूत्री सूत्रवर्जितः ।
कर्षकः कार्षकः क्षेत्री कृषाणश्चापि कु[६]र्षुकः ॥८॥
कृषीवलः कुटुम्बी स्याद्धली कृषिक[७] इत्यपि ।
लोष्टमस्त्र्यस्त्रियां लेष्टुर्दलनी दलिरुभे स्त्रियौ ॥९॥
महादलिश्च दलनिर्द्वे द्वयोर्दलनी स्त्रियाम् ।
स्यात्प्रतोदः प्रवयणं प्राजनं तोत्रतोदने ॥१०॥
भूदारणं खनित्रं स्यादवदारणमित्यऽपि ।
कुद्दालोप्यथ रम्भस्तु दण्डो दरकरोऽपि च ॥११॥
घासच्छेदी खुरप्रः स्यात्स्त्रियां दातिस्तु न द्वयोः ।
दात्रं लवित्रं तन्मुष्टौ वंठो[८]मत्यं समीकृतौ ॥१२॥

---

१ पला B मला K २ तत्प्राप्तं नित्यमादाय नित्यकं B यत्प्राप्तं निमयादापमित्यकमिति पाठः स्यात् ३ आविप्रा B आवप्ता चोत्तमर्णास्त्विति पाठः स्यात् ४ नर्घ्यं KC ५ कुट B ६ कर्षुकः KC ७ कृषीक C ८ सीत्यं C

स्याद्योक्त्रं योत्रमाबन्धो हल्यं[1] त्रिषु हलिः स्त्रियाम् ।
अपि नित्या निरीपं[2] च कालोऽस्त्री कूटकं कृषः ॥१३॥
कृषिको ना फलं क्लीबे न स्त्रियां हललाङ्गले ।
सीरो हालश्च भूम्यर्थदारणोऽथ स्त्रियामिमे ॥१४॥
ईशेषे सीरदण्डो ना सीता शीतास्य पद्धतौ ।
सीरपर्यायप[3]र्य्यर्था[4]निरीशं कूटकं च षण् ॥१५॥
कुशी कोशी लोहफले तदाधारे तु चर्वढम्[5] ।
अस्त्री श्रेणिः खलो धान्यपीडने पशुसंततेः ॥१६॥
खलमध्यगते कीले[6]मेढिर्मेथिरुभे स्त्रियौ ।
अथ स्याद्द्विविधं धान्यं[7]शूकशिम्बिसमुद्भवम् ॥१७॥
तत्र शूकेषु प्रथमे शालयः पुंस्यमी पुनः ।
रक्तशालिर्महाशालिः कलमः शकुनाहृतः ॥१८॥
दीर्घशूको रोध्रशूक[8]स्तूर्णकः शङ्खमौक्तिकौ ।
लाङ्गलः कर्दमो लोहवालो महिषमस्तकः ॥१९॥
पुण्ड्रः पाण्डुः पुण्डरीकः[9] प्रमोदो गौरसारिवौ ।
[10]शारामुखः शीतभीरुस्तपनी[11]यः सुगन्धिकः ॥२०॥
पुष्पाण्डको दीर्घतालो महादूषकदूषकौ ।
पतङ्गकः [12]काञ्चनको हायनोप्यथ षष्टिकाः ॥२१॥

---

१ हल्यस्त्रिषु^B २ निरोपं^B ३ पर्यार्था^B ४ निरोषं^B ५ चर्षदम्^B ६ मेढि^B
७ चेत्र^B ८ स्तूर्णः शंखक^B ९ कं^B १० शीरा^B ११ स्तपनी च^B १२ काचनको^B

गौरो महान् कुरवकः प्रमोदो[1]सनपुष्पकः ।
कुमुदः कालकः [2]पीतः केदारस्तूर्ण[3]काङ्गुभौ ॥२२॥
प्रायः स्युर्व्रीहयो व्रीहिर्महान्कृष्णो जतूद्भवः ।
सारामुखस्त्वरितको लावाक्षश्चीनशूकरौ ॥२३॥
पारावतः कुक्कुटाण्डो जालशालजदर्दुराः ।
कुरुविन्दो नन्दिमुखो हालो वरकराधनौ ॥२४॥
रक्तशूको रक्तशालिर्महतः शालितण्डुलौ ।
कलामाः कलमा भूम्नि नाकलम्बिश्च गारुडः ॥२५॥
शकुना[4]हृतपर्यायो राजहंसार्थ इत्यपि ।
दीर्घशूको लम्बशूके रोध्रशूकस्तु तत्समे ॥२६॥
शूकेथ तूर्णकः शीघ्रपाके[5]थाश्वयुजश्च सः ।
शङ्खशूकः शङ्खसमे मुक्तासदृशतण्डुले ॥२७॥
मौक्तिकोथो तैलिकः स्यात्तैलासी[6]चाथ लाङ्गलः ।
सीराकृष्टक्षितिभवः कर्दमः कर्दमोद्भवः ॥२८॥
लोह[7]तालेतिकठिनतण्डुलः पुण्ड्रकः पुनः ।
पुण्डरीकनिभः पाण्डुः पाण्डुरोप्यथ[8]गौरकः ॥२९॥
हरिद्राभः प्रमोदस्तु प्रह्लादश्चाथ सारिवः ।
[9]सारिवाभः पुण्डरीकपृष्ठः[10]श्वेतोत्पलोप्यथ ॥३०॥

---

१ शन K रान B २ पीतकेदार B ३ कांगुकौ C कांयुकौ K ४ द्ध C ५ को B
६ शी B ७ नालो B ८ गो B ९ शारीवाभः C सारिकामः B १० पृष्ठ KC

सुरामुखः कृष्णमुख[१]तण्डुलोथ सुगन्धिकः ।
गन्धशालिरथोशीतभीरुःशीतविनाश्यपि ॥३१॥
तपनीयोऽथ पुष्पाण्डः स च कोमलतण्डुलः ।
स्यान्महामदकारी तु मह[२]रूषक इत्यपि ॥३२॥
दीर्घनालो लम्बनाले मदकारी तु रूषकः ।
स्वर्णशालिः काञ्चनः स्यात्पतङ्गः कुङ्कुमाकृतिः ॥३३॥
हायनः कुशवाकः स्या[३]द्घटप्रच्छोथ षष्टिकाः[४] ।
षष्टिरात्रेण ये क्षेत्रे परिपक्वा भवन्ति ते ॥३४॥
एवमेव व्रीहयोऽपि समुन्नेया यथाक्रमम् ।
श्यामाकः श्यामकोऽपि स्यादविपर्यायतः प्रियः[५] ॥३५॥
स्त्रीबीजः सुकुमारश्च तृणबीजोत्तमश्च सः ।
राजधान्यं पुनः क्लीबे क्षेत्रजो वनजश्च सः ॥३६॥
द्विविधो हस्तिश्यामोऽथ प्रियङ्गुः पीततण्डुलः ।
रागी च कङ्गुः कणिशो लाञ्छनो बहुकाणिशः ॥३७॥
स्यात्[६]स्त्रियां कंगुनी कृष्णा मधुका शैकिकाचसा ।
रक्ता पीता तु[७]शुमटी सैव स्यादथ चीनकः ॥३८॥
स्त्रियां स्यान्माधवी सैव काकपर्यायकंगुनी ।
[८]कोरदूषः कोद्रवः स्यादुद्दालो वनकोद्रवे ॥३९॥

---

१ मुखस्त^B^ २ रुष^C^ शेष^B^ ३ द्घोटपुत्रे^BC^ ४ का^KC^ ५ प्रियः ^KC^ पुनः^B^
६ साया^B^ ७ शमठी^B^ ८ कौर^B^

मदनाङ्को देशदेशसंभवो भिन्नजातिकः ।
श्यामाकः कोद्रवः[1]कंगुर्नीवारो मकरः कुली ॥४०॥
तृणधान्यान्यमून्येके सरागीण्यथ कञ्चुकी ।
धान्यराजस्तीक्ष्णशूको हयपर्यायवल्लभः ॥४१॥
यवो मेध्यान्नपर्यायो हविष्यः [2]शितशूककः ।
दिव्योक्षतस्तीक्ष्णशूकः पवित्र[3]स्त्यक्तुरित्यपि ॥४२॥
[4]स्तोकः स्तोक्यश्च हरिते द्विविधोऽपि प्रकीर्त्तितः ।
शूकमुण्डोऽशूकमुण्डो गोधूमः स च वंशजः ॥४३॥
वंशधान्यं वंशबीजो यवपर्यायसंभवः ।
गोधूमः सुमनो[5]पूपः क्षीरी निस्तुष इत्यपि ॥४४॥
रसालश्चाथ तद्भेदाः स्त्रियां नान्दीमुखीत्यपि ।
मधूली हंसवाजीककाष्ठकाद्याश्च[6]तद्विधाः ॥४५॥
बृहन्तो लघवश्चाथ यावनालः स्त्रियां पुमान् ।
दीर्घनालो यवनलः शिखरी[7]वृन्ततण्डुलः ॥४६॥
क्षेत्रेक्षुरिक्षुपर्यायपत्रो दीर्घशरश्च सः ।
योनली बीजपुष्पी च जूर्णा जूर्णिश्च जारिणी[8]॥४७॥
जारिर्जरिर्देवधान्यं[9]धवलेतरतण्डुलः ।
नक्षत्रकूरस्तारः स्याद्वृत्तो मौक्तिकतण्डुलः ॥४८॥

---

१ कुङ्गुर^C २ सित^B ३ त्रः सक्तु^BK ४ तोकस्तोकमश्च^K तोकस्तकमश्व^B ५ यूपः^C यूपः^K ६ तच्छिदाः^B ७ वृत्त^K वृत^B ८ णि^B ९ धवलोतार^K धवले तार^B

रक्तकुस्तुंवरो रक्ते[1]तूवरो वर इत्यपि ।
बृहती काण्डकणिशा श्वेतरक्तविभेदतः ॥४९॥
राजपर्यायजूर्णाह्वा वाजरिश्चाथ[2]वर्चेटः ।
मञ्चूको मकरो मल्लः[3]चुडोऽस्मिन्मणि[4]की स्त्रियाम् ॥५०॥
अस्त्री कणिशकिंसारु[5]सस्यशूकं नपुंसकम् ।
अथ स्याच्छिम्बिजं मुद्गः सूपमुख्यो रसोत्तमः ॥५१॥
भुक्तिप्रदो हयानन्दो भूफलस्तत्र चासिते ।
वासन्तेऽपि च लोभ्यः स्यात्सुराष्ट्रोत्थोऽथ पीतके ॥५२॥
प्रवेलशारदजया नीले हरितशाखिकौ ।
वसुर्वनाखुः[6]खण्डीरो हरिमन्थश्च धूसरः ॥५३॥
वनजे तु कुलीनः स्या[8]दुरकेऽपि निगूढकः ।
माषो बली बीजवरः कामार्थश्च पुरीषणः[9] ॥५४॥
वृषाकरो धान्यवीरः कुरुविन्दोऽपि मांसलः ।
पित्र्यो[10]बलाढ्यः काचराजपदात् माषो परो लघुः ॥५५॥
चणस्तु हरिमन्थः स्यात्कञ्चुकी कृष्णकञ्चुकः ।
बालभोज्यो वाजिभक्ष्यः सुगन्धस्त्रिविधश्च सः ॥५६॥
धूसरः श्वेतकृष्णश्च मकुष्टस्तु[11]मयुष्टकः ।
कृमी[12]लको वनमुद्गो वल्लीमुद्गोऽमृतोऽपि च ॥५७॥

१ तूम्बरौ[B] २ चर्पटः[B] चर्चटः[K] ३ चुद्रो[B] द्रा[K] ४ का[B] ५ रू[B] ६ क्यु:[KC] ७ बुक[B] ८ दुरको इति पाठः स्यात् ९ तनः[B] १० बलाग्रः। ११ मपुष्टकः[B] २२ कृमीणको[B]

सूरो मसूरो मङ्गल्यो रक्तपर्यायदालिकः ।
पृथुकल्याण[1]गुडतो बीजः[2]कृष्णो वसन्तकः ॥५८॥
[3]कलायो मण्डचणको हरेणुश्च द्वयोः पुनः ।
सतीनकः[4]सतीलेऽपि [5]कलापश्चापि पुंस्ययम् ॥५९॥
शमनो नालकः [6]कण्ठी द्वयोर्लङ्का तु रूक्षणा ।
करा[7]ला[8]त्रिपुरापिस्यात्का[9]ण्डिका चात्मिका च सा ॥६०
आढकी तुवरी वर्णकरा वीरभुजा च सा ।
वृत्तबीजा पीतपुष्पा वंश[10]पर्यायसंभवा ॥६१॥
नान्दीमुखो राजमाषश्च[11]वलो[12]वर्वरो स्त्रियाम् ।
[13]पावकश्चापि कुल्माषः श्वेतवर्णोऽपरा स्त्रियाम् ॥६२॥
श्वेतवृन्ता कृष्णवृन्ता श्वेतादिवर्णभेदतः ।
कुलत्थिका रक्तवृन्ता कृष्णवृन्तः कुलत्थकः ॥६३॥
क्षवः[14]क्षुधाधिजननो मधुरः सुकुमारकः ।
वृत्तबीजो दीर्घशिम्बी चपलोप्यथ नेः परः ॥६४॥
पावः स्याच्छितिशिम्बिश्च[15]वल्ली बहुविधश्च सः ।
माध्वीकः श्वेतनिष्पावः स्यात्स्त्रियां मधुशर्करा ॥६५॥

---

१ गड[B] १ कृष्णो[B] ३ कलापो[B] ४ सतीनो[B] ५ कलाय[B] ६ कंटीद्वयोलङ्का[C] शुण्ठीद्वयोलङ्का।[B] ७ ल[B] ८ त्रिपुटेति पाठः स्यात् ९ ण्डी[KB] १० पर्यायि ११ श्रसलो[B] १२ वर्वटो[K] चर्वच[B] १३ यावक १४ क्षुताभि[BC] क्षुधावि[K] १५ वल्लो[KC]

पलंकषा स्थूलशिम्बी वृत्ता मधुसिता सिता ।
नन्दिजः कटुनिष्पावः[१]कर्बुरो वनसंभवे ॥६६॥
काकाण्डोऽथ तिलो हव्यो देवर्षिपितृवल्लभः ।
होमधान्यं पवित्रं स्यात् पापघ्नः पितृतर्पणः ॥६७॥
पूतधान्यं जर्तिलस्तु वनजे स तु निष्फलः ।
तिलात्पेजश्च पिञ्जश्च स तु ज्ञेयश्चतुर्विधः ॥६८॥
गोमूत्रसंनिभः कृष्णः श्वेतः कर्बुर इत्यपि ।
वज्रपर्यायपुष्पार्थं[२]स्यात्तत्र तिलपुष्पके ॥६९॥
अतसी[३]पिच्छला देवी मदगन्धा मदोत्कटा ।
उमा क्षुमा हैमवती सुतीक्ष्णा नीलपुष्प्यपि ॥७०॥
[४]अकसी त्वा सुरी राजी तीक्ष्णगन्धा मधूलिका ।
पुंसि क्षवः क्षुतो रक्तसर्षपो राजसर्षपः ॥७१॥
पुंसि[५]क्षुधान्नभिजनः क्षुताभिजननः स च ।
राजिका कृष्णिका चाथ सिद्धः सिद्धप्रयोजनः ॥७२॥
सर्षपः साधनो भूतनाशनः सितसर्षपः ।
कटुतैलः सरिषपो गौरः सिद्धार्थ इत्यपि ॥७३॥
मङ्गल्योऽपि च केशारिरथ स्यात्तिलकल्कके ।
पललं तिलचूर्णं तु पिष्टकं तिल[६]किट्टके ॥७४॥

---

१ कब्बुरो[B] २ र्थं:[KC] ३ पिच्छिला[B] ४ अतसी[B] ५ क्षुधाभिजमन इतिपाठः स्यात् ६ कद्रुके[B]

पिण्याकः पुंस्यथ खलिर्निस्नेहस्तिलकल्कजः ।
कणिशं धान्यकोशोना स्त्रियां स्यात्सस्यमञ्जरी ॥७५॥
सस्यार्थाच्छीर्षपर्यायं न स्त्रियां शूकमित्यपि ।
श्लक्ष्णतीक्ष्णाग्रके चाथ शाल्याद्या निस्तुषीकृताः ॥७६॥
त्रिःकृत्वः कण्डिताः शुद्धास्ताण्डुला अथ पुंस्यमी ।
बहुत्वे शालयो[1]भ्रष्टा लाजा अथ तथा यवाः ॥७७॥
धाना आर्द्रा व्रीहयस्तु भ्रष्टा अत्यन्तकण्डिताः ।
पृथुकश्चिपिटास्तेस्यु[2]र्गोधूमाः स्युस्तथाविधाः ॥७८॥
लुंबिका[3]तुलुका भ्रष्टाः शिम्बिधान्यस्य शिम्बयः ।
अर्द्धस्विन्नास्तु कुल्माशाः कण्डनादिक्रियां विना ॥७९॥
शिविः शिंवी सिविः सिंवी सिवा[4]सिंवा शिमिस्त्रियः ।
धान्यान्मा[5]ता च कोशोऽथ समूहे धान्यसंभवे ॥८०॥
अपि स्तम्बकरिर्गुच्छो[6]वालस्त्रिष्वपि चास्त्रियाम् ।
[7]काण्डेऽफले पलालोऽस्त्री पलोथापि कडङ्गरे ॥८१॥
वुसं क्लीबे वुसेरुः स्यादस्त्रियामथ पुष्कसः ।
पुंसि स्यादथ धान्यत्वक् तुषःपुंस्यथ च[8]स्त्रियाम् ॥८२॥
दालिर्दाली चणादीनां स्फोरो नरि यवोद्भवे ।
पिष्टे सक्तुः पूर्णाकः स्यादापूपः[9]परकोऽस्त्रियाम् ॥८३॥

---

१ भृष्टा इति स्यात् २ गौं$^{B}$ ३ वलुका$^{B}$ ४ शिंवा शिमी स्त्रियाम्$^{B}$ ५ माष$^{B}$
६ नाळ$^{B}$ ७ काण्डफले$^{B}$ ८ चास्त्रियाम्$^{B}$ ९ पूर्णाको$^{KC}$

विकसो वापि गोधूमसंभवे समिता स्त्रियाम् ।
स्फोटे गोधूमजे[1] स्थूली कणिका यावनालजे ॥८४॥
चणोत्थे वेसवारो ना पिष्टं माषभवे न ना ।
सर्वं स्याच्चाक्रिकं चूर्णं शिलापिष्टे तु पिष्टिका ॥८५॥
त्रिष्वम्बुना[2] विना पक्को भ्रष्टः पुंसि भरूजकः ।
भरुजः[3] क्लेदितभ्रष्ट[4] उद्रूषः परिवाष्टिका ॥८६॥
खदिका स्त्र्यथ धानानां श्लक्ष्णचूर्णेषु सक्तवः ।
तत्र मन्थो घृतमधुद्राक्षेक्षुरसमिश्रितः ॥८७॥
तस्मिञ्जलविमिश्रे तु चिक्कणो मसृणोऽपि च ।
दध्ना संमिश्रितं तत्र करम्भः स्यादतः परम् ॥८८॥
शिंबिधान्यं जलक्लिन्नं साङ्कुरं[5] मणिरूढकम् ।
त्रिषु रिद्धं त्वावसितमृद्धं वृद्धं समृद्धकम् ॥८९॥
प्रणीतमुपसम्पन्नं प्रशस्तं च सुसंस्कृतम् ।
धान्ये बृहति संपन्नमयोग्रं मुसलोऽस्त्रियाम् ॥९०॥
मुशलोप्यथ कण्डन्यामुदुलूभ्यां खलस्त्रिषु ।
स्यात् क्लीबे पवनं शूर्पं सूर्पं प्रस्फोटनं पुनः ॥९१॥
त्रिषु वस्तुनि तत्पूते शोधितं निर्बुसीकृतम् ।
फुल्लफालस्तु तद्वाते स्त्रियां क्लीबे तु चालनी ॥९२॥

---

१ स्थली[B] २ आतूपक्के भ्रष्टं[B] ३ भरुतः क्लेदितो[B] ४ विदूषः परिवादिका[K]
५ परिरूढ[KC]

अस्त्रियां तितउ क्लीबे परीपवनमित्यपि ।
स्यात्तद्वत्पारिपवनं[1]पावीरश्चापि पुंस्ययम् ॥९३॥
प्रस्थोऽस्त्रियां स्त्रियां पाली पालिश्चापि स्त्रियामथ ।
स्यात्कटस्त्रिष्वलिङ्गो ना प्रसेवः स्यूत इत्यपि ॥९४॥
[2]कण्डोलः पिटकः पुंसि स्त्री शाला सूदपाकयोः ।
स्त्रियां रसवती तत्राध्यक्षः पौरोगवस्त्रिषु ॥९५॥
सूपकारो वल्लवः स्यात्सूदोप्याारालिकः पुनः ।
गुण्श्चौदनिकोथ स्याद्भक्तपर्यायकारके ॥९६॥
आपूपिकः[3]कान्दविकः क्लीबे[4]शमन्तकमित्यपि ।
उदोध्यानं च धानं च ह्लानं षण् चुह्यपि स्त्रियाम् ॥९७॥
तथा चुल्लिरपि ज्ञेया तद्वतूसाधिश्रयण्यपि ।
अन्तिकाथ हसन्ती तु हसन्यङ्गारधानिका ॥९८॥
अङ्गारात्पात्री शकटी क्लीबेऽलातं तथोल्मुकम् ।
तत्सामिज्वलिते काष्ठे[5]सधूमेथ विधूमके ॥९९॥
अङ्गारेङ्गालो निर्वाणे कोकिलो लाहकोऽपि च ।
आष्ट्राम्बरीषौ द्वावस्त्री स्त्रियां कन्दुः[6]स्थितो नले ॥१००॥
घृतादिना[7]क्लेदिनि स्यात्कटाहस्त्रिष्वलिङ्गरः ।
अस्त्रियां पिठरं कुण्डं क्लीब आस्था[8]ल्युखे स्त्रियौ ॥१०१॥

---

१ पाटीर^KC २ कडोलः^KC ३ कावम्बिकः^B ४ पूमान्तक^KC ५ विधूमेथसधूमके^C तत्सामीप्यादिपङ्क्तिद्वयं^K पुस्तके नास्ति ६ स्थिते नले^B ७ क्लेदिते^B ८ लखुके^B

चरुः पुमान्स्त्रियां नन्दानन्दिरालूर्गलन्तिका ।
वर्द्धनी करकः पुंसि घटोऽस्त्री कलशो द्वयोः ॥१०२॥
कुम्भश्च कलसोऽपि स्यात्करीरोऽपि कुटोऽस्त्रियाम् ।
निपोप्यथ स्त्रियां पारी दोहनी रोहणीति च ॥१०३॥
तुम्बा निलिम्पा क्लीबे स्यान्निपानमपि वा स्त्रियाम् ।
अलिञ्जरो मणिश्चापि न द्वयोः स्यादुदञ्चनम् ॥१०४॥
करङ्को नारिकेलस्य कटाहः कुठरो द्वयोः ।
वर्द्धमानः शरावेऽस्त्री पुमाञ्शालाजिरोप्यथ ॥१०५॥
ऋजीषं स्यादृचीषं च क्लीबे स्यात्पिष्टपाककृत् ।
कंसोऽस्त्री चषकः पानभाजनेपि स्त्रियां च षण् ॥१०६॥
स्थालं पात्रममत्रं स्यात् क्लीबेथापि स्त्रियां करिः ।
दर्वि[1]र्दर्वी कंविरपि दारुहस्तः कडच्छकः ॥१०७॥
तर्दूः स्त्रियां काष्ठलोही[2]शतर्द्री स्यादथापरा ।
स्यात्[3]पल्लिका कुन्तलिका दध्यादिच्छेदिनी[4]तु या ॥१०८॥
अथ स्त्रियां कुतूः कृत्तेः स्नेहपर्यायभाजनम् ।
[5]सैवाल्पा कुतुपः पुंसि क्लृप्ता[6]ऽसंस्कृतचर्मणा ॥१०९॥
संस्कृतेन दृतिः पुंसि खल्लो स्त्र्यालूश्च चर्मणा ।
करपात्री चाथ मेथा मन्थः स्यान्मन्थदण्डकः ॥११०॥

---

१ कुवि B २ शालर्द्री KC ३ पीलका KC ४ च KC ५ सैव स्यात्कुतुपः B ६ प्राप्ता B ७ स्म्यत्कृत B

क्षुब्धस्तदर्गले तु स्यात्कुठरोप्यथ मर्कटी ।
स्त्रियां प्रत्यर्गले नेत्रं क्लीबे व्यावर्त्तनं च तत् ॥१११॥
मूलकन्दकरीराग्रफल[1]काण्डविरूढकैः ।
त्वक्पत्रकवकैरेवं शाको दशविधः स्मृतः ॥११२॥
स्व[2]दनं व्यञ्जनं क्लीबे तेमनं स्यादजामिकृत् ।
मूलकोऽस्त्री नीलकण्ठो मृत्क्षारः कन्दमूलकः ॥११३॥
हस्तिदन्तः शङ्खमूलो हरित्पर्णः सितोऽपि च ।
रुचिरोथ स्थूलमूलः स च चाणक्यमूलकः ॥११४॥
विष्णुगुप्तो महाकन्दो वालेयो मरुसम्भवः ।
शालाककटुकश्चापि कौटिल्यश्चाथ गृञ्जनः ॥११५॥
यवनेष्टः शिरामूलो ग्रन्थिमूलोऽपि वर्त्तुलः ।
शिखाकन्दः पिण्डमूलो[3]गजाण्डः पिण्डकः पुनः ॥११६॥
अथ षण् गर्जरं पीतमूलं स्यात्पीतकन्दकम् ।
सुमूलं स्वादुकन्दं च नारङ्गमथ शिग्रुकः ॥११७॥
हरिच्छाकः शाकपत्रः सुपत्रश्चोपदंशकः ।
बहुमूलो दशमूलः [4]कामलच्छद इत्यपि ॥११८॥
तीक्ष्णमूलो नीलशिग्रौ[5]तीक्ष्णगन्धो जनप्रियः ।
शोभाञ्जनस्तत्र कृष्णो रुचिराञ्जन इत्यपि ॥११९॥

---

१ काण्डापिकाढकैः B २ खदनं व्यञ्जनं B ३ गजाङ्गः B ४ कामच्छादं B ५ तीक्ष्णगन्ध इत्यारभ्य श्वेतशिग्राविल्यन्तं B पुस्तके नास्ति ।

मुखामोदः श्वेतशिग्रौ मुखभङ्गश्च रोचनः ।
सुमूलः श्वेतमरिचस्तीक्ष्णः स्यादथ रक्तके ॥१२०॥
मधुरो मधुशिग्रुः स्यात्सुगन्धो बहुलच्छदः ।
अपि केसरिपर्यायोप्यथ वेणुर्महाबलः ॥१२१॥
तृणकेतुर्यवफलो वंशः कर्मार इत्यपि ।
शतपर्वा दृढग्रन्थिर्मसूरोप्याढकीफलः ॥१२२॥
सारशून्यो मस्करः स्यात्त्वक्सारोऽपि धनुर्द्रुमः ।
त्वचिसारोपि तद्वत्स्यात् तेजनो रम्भ इत्यपि ॥१२३॥
सच्छिद्राः कीचकास्ते स्युर्ये स्वनन्त्यनिलेरिताः ।
[1]भोरटं पूरणं वंशात्तन्मूलेथ तदङ्कुरे ॥१२४॥
अस्त्री करीरो वंशाग्रं तद्ग्रन्थौ तु द्वयोः परुः ।
पर्वा स्त्री काण्डसन्धिर्ना परुः पारु त्वगस्य तु ॥१२५॥
तमालः पुंसि चाथ स्यान्मृदुपर्वा तु वेत्रकः ।
योगिदण्डः सुदण्डोऽथ माकन्दी बहुमूलिका ॥१२६॥
मोदनी गन्धमूली स्याद्राका[2]विशदमूलिका ।
सौली वनहरिद्रायां वनारिष्टाथ[3] पेडका ॥१२७॥
[4]वन्यार्द्रकाथो रसोने लशुनो[5]रशुनोऽस्त्रियाम् ।
उग्रगन्धो म्लेच्छकन्दो भूतघ्नः षण्महौषधम् ॥१२८॥

---

१ मोरटं B २ विषम B ३ पेड्डुका C पेंडका B ४ वन्याद्राका B ५ लशुनो B

तत्र रक्ते दीर्घपत्रो यवनेष्टश्च गृञ्जनः ।
स्थूलकन्दः पलाण्डुस्तु तीक्ष्णकन्दश्च दीपनः ॥१२९॥
मुखाद्दूषणगन्धाह्वः शूद्रपर्यायतः प्रियः ।
स्त्रिया[1]मुल्ली कृमिहरो बहु[2]पत्रो विरोचनः ॥१३०॥
विश्रगन्धः स च श्वेतः पीतो राजपलाण्डुकः ।
यवनेष्टो दीर्घपत्रो राजपर्यायतः प्रियः ॥१३१॥
कण्डूरः सूरणः कन्दो मुकन्दः स्थूलकन्दकः ।
दुर्नामारिर्वृत्त[3]कन्दो वातारिः स्कन्दवर्धनः ॥१३२॥
रुच्यकन्दस्तीव्रकन्दः शूरकन्दः सितोपरः ।
सच वन्योप्यतोन्यः स्यादकण्डूरोऽपि पूर्ववत् ॥१३३॥
अम्लिका स्वल्पविटपा सुकुमाराम्ल[4]नामिका ।
अर्शोहिताम्लिकाकन्दः फलकन्दोऽपि चेष्यते ॥१३४॥
मुखालु[5]र्मण्डपारोही दीर्घकन्दः सुकन्दकः ।
स्यात्स्वादुस्थूलवत्सेभ्यः कन्दः स्यादथ रोमशः ॥१३५॥
पिण्डालुर्ग्रंथिलः पिण्डकन्दस्ताम्बूलपत्रकः ।
लोमशः पित्तकोपि स्यान्नानाकन्दोऽथ लोहिते ॥१३६॥
रक्तपिण्डो लोहितालुः कासकन्दस्तु कन्दिलः ।
विशालपत्रश्चालुः स्यात्कासालुः स्यादथापि च ॥१३७॥

---

१ मूल्ली B २ पुत्रो B ३ वृंत्र KC ४ नासिका KC नाडिका B ५ भंडपा B

कर्कोटिका तु कूष्माण्डी कुम्भाण्डी स्याद्बृहद्बला ।
मृदङ्गकुम्भपुष्पेभ्यः फला स्यात्सुफलापि च ॥१३८॥
गोरक्षतुम्बी गोरक्षी [1]नाधाला दुर्घटाह्वया ।
क्षीरतुम्बी दीर्घफला[2]परीवृत्तफला च सा ॥१३९॥
महाफला दुग्धबीजा दन्तबीजा पयस्विनी ।
[3]अलाबुः स्यान्महावल्ली श्रमघ्नी सापि चेत्कटुः ॥१४०॥
स्त्रीक्ष्वाकुः क्षत्रियवरा[4]दीर्घवीजाथ भूद्भवा ।
[5]वल्मीकोत्था भूमितुम्बी शक्र[6]चापोद्भवा च सा ॥१४१॥
नागतुम्बी दिव्यतुम्बी देव्यथ श्यामबीजिनी ।
स्याच्चित्तमांसमधुरवृत्तेभ्यः फलिनी च सा ॥१४२॥
घृणायाश्चित्रवल्ली स्यात् कलिङ्गी रक्त[7]बीजका ।
चीनाकी चीनकी चीना तिन्दुकी तिन्दिसी च सा ॥१४३॥
कोशातकी स्वादुफला जालिनी कर्कशच्छदा ।
कर्कोटकी पीतपुष्पा स्या[8]द्दीर्घधारयोः फला ॥१४४॥
धामार्गवः पुमान्[9]पोषानको बहुविधा च सा ।
अन्या हस्तिबृहद्ग्राम्यकोशातक्यथमण्डपी ॥१४५॥
पटो[10]लीदीर्घमधुरशिखिस्त्रादुभ्य एव सा ।
स्यात्पटोलं राजफलं तन्मूलं रम्यकं पुनः ॥१४६॥

---

१ नाघाला B २ परावृत्त B ३ स्यालावुः B ४ चरा B ५ वाल्मी B ६ पावो KCS ७ बीजिका B ८ हीर्घाधारयोः कला B ९ कोषातकी B १० पटोलीत्यादिपङ्क्तिद्वयं KCS पुस्तकेषु न दृश्यते ।

द्विविधा फलभेदेन काकाण्डी कोलपालिका ।
पर्यङ्कपालिका खट्वा खट्वाङ्गी दधिपुष्प्यपि ॥१४५॥
असिपर्यायशिम्ब्यर्था सुशिम्बी[1]स्थलशिम्बिका ।
कारवल्ली तु कटुका चीरी[2]पत्रा कठिल्लका ॥१४६॥
सितपुष्टाम्बुसूक्ष्माभ्यां वल्ली कण्टफलाप्यथ ।
कर्कोटकी स्वादुफला मनोज्ञा च मनस्विनी ॥१४७॥
वोधना बन्ध्यकर्कोटी देवी कण्टफलाप्यथ ।
व्याघ्री कण्टलता व्याली मांसी चाखुनखी मृगी ॥१४८॥
मार्जारिण्यथ विम्बी तु तुण्डी रक्तफला च सा ।
अधरोष्ठफला पीलुपर्णी सा रुचिरात्फला ॥१४६॥
कटुस्वादुफला द्वेधा ग्रामतः पविका तु[3]सा ।
मण्डपी कलिका[4]शिम्बी कलिनी नखपूर्विका ॥१५०॥
निःपावी स्याद्गुच्छफला फलिनी चिपिटा च सा ।
विशालाप्यथ वार्त्ताकी वृन्ताकी कण्टपत्रिका ॥१५१॥
कटालुर्मांसलफला शाकश्रेष्ठा च कट्फला ।
महोटिका च निद्रालुर्वृन्ताकी महती च सा ॥१५२॥
चित्रफला कण्टकिनी जनप्रियफला पुनः ।
रक्तनीलमिश्रवर्णश्वेतेभ्यः फलसंज्ञका[5] ॥१५३॥

---

१ स्थूल^B २ पान्त्रा कटिह्लिका^B ३ च^B ४ शिम्बकिलिनी^B ५ ज्ञिका^B

वातिङ्ग[1]णोपि वार्त्ताकी वार्त्ताको वातिगो[1]पि च ।
वार्तापि हिङ्गुली भाण्टी वृन्ताको[2]वातिकश्च सः ॥१५६॥
वार्त्ताकुश्च द्वयोश्चैव भतकी[3]बङ्गकी च षण् ।
डङ्गरिः स्त्री[4]गण्डरिः स्याद्दीर्घेर्वारुश्च[5]गण्डरी ॥१५७॥
गजदन्तफला नाग[6]शुण्ड्यथो वृत्तकर्कटी ।
सा खरत्वक्फला[7]तिक्तषड्रखाङ्कितसत्फला ॥१५८॥
मधुपाकफलाथ स्यादथच्छर्दालु[8]कर्कटी ।
पीनसा स्या[9]त्कटुदला त्रपुस्या संनिका पुनः ॥१५९॥
अपि लोमशकाण्डा स्याद्धस्तिपर्णी च मूत्रला ।
[10]कन्दालुस्त्रपुषी[11]पीतपुष्पी बहुफलापि च ॥१६०॥
सैव को[12]शफलापि स्यादथेर्वारुस्तु[13]कर्कटी ।
उर्वारुरपि चेर्वारुर्व्यालपुत्री च रोमशा ॥१६१॥
स्थूलतोयहस्तिदन्तपर्यायेभ्यः[14]फला च सा ।
शारदी[15]वासुकी स्निग्धफला बहुफला च सा ॥१६२॥
चैत्रकर्कटिका चैव मधुरार्थात्फलार्थका ।
सुचित्रा चिर्भिटी चित्रफलाथ चैत्रचिर्भिटी ॥१६३॥
[16]पथ्या पाण्डुफला चिर्भिटिका रोचनतः फला ।
मध्यपीतफला सैव चिक्कणान्तःफलद्रवा ॥१६४॥

---

१ वातिङ्गुणो B  २ वातिकः पुनः B  ३ वङ्गकं च B  ४ गण्डरीश्च B  ५ डङ्गरी B
६ शुण्ठ्य B  ७ तिक्ताषड्रखाङ्कितमस्तका B  ८ नु KC तु B  ९ स्याद्रक्तफला आपुस्या संत्रिका B  १० कण्टालु B  ११ दीत K वीत C  १२ काराफला B  १३ श्च B  १४ कला KC
१५ वासुकी B  १६ पथ्येत्यादिपङ्क्तिचतुष्टयं B पुस्तके नास्ति ।

कर्कट्यथ मृगाक्षी तु श्वेतपुष्पा मृगादिनी ।
मृगेर्वारुश्चित्रवल्ली कट्फला लघुचिर्भिटी ॥१६५॥
कपिलाक्षी बहुफला मृगचिर्भिटिका च सा ।
मृगेक्षणा चित्रफला देवी पथ्यामरूद्भवा ॥१६६॥
स्या[1]त्क्षीणमर्कटी त्वन्या राजकर्कटिका पुनः ।
मैथिली जानकी सीता वैदेही भूसुतापि च ॥१६॥
[2]शीता योजनगन्धास्य पत्नी दशरथः पिता ।
स च दाशरथोऽपि [3]स्याच्चत्वारो भ्रातरोऽस्य तु ॥१७॥
भरतः स च कैकेयः कैकेया [4]कैकयी च सूः ।
अस्याथ लक्ष्मणोऽपि स्याल्लक्षणस्तदनूद्भवः ॥१८॥
शत्रुघ्नः सोऽपि सौमित्रिः [5]सौमित्रेयावुभावपि ।
क्रमादेषां तु तनया रामस्य तु कुशो लवः ॥१६॥
भिन्नवाक्यादेकयोक्त्या तौ विज्ञेयौ कुशीलवौ ।
वाल्मीकिशिष्यौ भरतपुत्रौ तक्षकपुष्करौ ॥२०॥
लक्षणस्याङ्गदश्चित्रकेतुः शत्रुघ्नजावमू ।
सुबाहुः [6]सूरसेनश्च कौशल्या राममातरि ॥२१॥
कौसल्याप्यथ कृष्णस्तु वासुदेवो गदाग्रजः ।
अपि दामोदरः शौरिः [7]शौरी सौरिश्च यादवः ॥२२॥
यादवेन्द्रो देवकेयो गोविन्दः पाण्डवायनः ।
बलानुजो गोकुलेशो दाशार्हः स्मरदेहकृत् ॥२३॥
भौमी जाम्बवती भामा सत्या भद्रा च लक्ष्मणा ।
कालिन्दीमित्रविन्दादिपतिपर्याय इत्यपि ॥२४॥

---

१ कौशलेयः B २ सीता B ३ स्यात्पतुरो C स्यापनुरो K ४ कैकयी B ५ सौमित्रेय-उभावपि CK ६ सरसेनश्च B ७ शौरिः पद्मश्च B

वनमाल्यर्जुनार्थेभ्यः सखा सारथिरित्यपि ।
अरिष्टकेशियवनकंसचाणूरमर्दनः ॥२५॥
वसुदेवोऽस्य जनको दुन्दुरानकदुन्दुभिः ।
भूकश्यपः चित्यदितिर्देवकी देवकी च सूः ॥२६॥
अश्वाश्च [1]शैब्यसुग्रीवमेघपुष्पबलाहकाः ।
शुकपिच्छस्वर्णमेघपाण्डुवर्णाः क्रमादमी ॥२७॥
[2]शैब्यस्तु दक्षिणे वामे सुग्रीव उभयोरपि ।
पृष्ठवाहावुभावास्तां मेघपुष्प[3]वलाहकौ ॥२८॥
ध्वजो भुजङ्गहा मन्त्री पवनव्याधिरुद्धवः ।
सैन्यमेतस्य दाशार्हा दासार्हा यादवाश्च ते ॥२९॥
गदोनुजः पाञ्चजन्यो दक्षिणावर्त्त इत्यपि ।
शङ्खो माला वैजयन्ती चक्रमस्त्री सुदर्शनः ॥३०॥
[4]सुनाभं पुंस्यरिः खड्गो नन्दकः कौस्तुभो मणिः ।
अन्यः स्यमन्तकः शार्ङ्गं धनुः कौमोदकी गदा ॥३१॥
[5]एकानंशा[6]स्वसाथ स्याद्दारुकश्चास्य सारथिः ।
श्रीवत्सोऽङ्कोऽस्य गरुडो वाहनं मथुरा पुरी ॥३२॥
द्वारकाप्यथ वैदर्भी रुक्मिण्यपि च कामसूः ।
भैमी सत्या सत्यभामा बलदेवो हलायुधः ॥३३॥

---

१ शैत्रेति पाठः सर्वत्र २ शिवस्तु CK ३ बलाहकौ B ४ सुनाभः B ५ येकानंशा B
६ स्वसार्था B

कृष्णाग्रजो बलभद्रो बलो रामः सितासितः ।
प्रलम्बरुक्मिमद्विविदहन्ता कामार्थपालकः ॥३४॥
नीलार्थादम्बरार्थोऽपि तालाङ्को मुसली हली ।
यमुनार्थात्कर्षणार्थः [1]संवर्त्तक्येककुण्डलः ॥३५॥
संवर्त्तको रेवतीशः सुरापर्यायवल्लभः ।
रौहिणेयश्चैकचरः सात्वतो हलमस्य तु ॥३६॥
संवर्त्तकाख्यं मुशलं सौनन्दं च सुतः शठः ।
मदनो मन्मथो मारः प्रद्युम्नो दर्पकः स्मरः ॥३७॥
कामो विधाता कंदर्प [2]आमोजो विषयी पुनः ।
सूर्पशम्बरवैर्यर्थः पञ्चबाणार्थ इत्यपि ॥३८॥
मीनपुष्पार्थयोः केतूरमिलः कमनो रमः ।
रत्यर्थात्पतिपर्याय आत्मभूर्मकराङ्ककः ॥३९॥
मनोलक्ष्म्यङ्गशृङ्गारकृष्णार्थेभ्यो [3]जनुश्च सः ।
मनःशयो जराभीतपर्यायः कन्तुरित्यपि ॥४०॥
पुष्पपर्यायबाणार्थः संसारगुरुवाचकः ।
चन्द्रपर्यायसचिवो मधुपर्यायसारथिः ॥४१॥
भीरुपर्याय[4]सैन्यास्त्रसहायार्थोऽपि कञ्जसूः ।
मुर्मुरो रणरणको रूपास्त्रः कनकः पुनः ॥४२॥

---

१ सवर्तB २ अमोजो विषमीB ३ नुजश्चB ४ सैन्यार्थोऽस्त्रसहायश्च ।

मधुपर्यायपुष्टार्थः स्वरोचिश्चास्य तु प्रिया ।
केलती से रागलता [1]सेवा केलिकला रतिः ॥४३॥
पुत्रो [2]निरुद्ध भृष्याङ्क उषेशो ब्रह्मसूरपि ।
बाणारिरस्य पत्नी स्यादुषाप्यूषाथ मार्गणाः ॥४४॥
अरविन्दमशोकाख्यं चूतं च नवमल्लिका ।
नीलोत्पलं तथा चान्ये प्राहुरुन्मादनः पुनः ॥४५॥
संतापनः शोषणश्च मारणश्चापि मोहनः ।
पञ्च कामस्य पुत्र्यौ द्वे प्रीतितृष्णे ततो मदः ॥४६॥
मोहः क्रोधो लोभदम्भा एतस्य परिचारकाः ।
अरुणार्थादवरजो विनतातनयार्थकः ॥४७॥
सौपर्णेयः स्वर्णकायः कामायुर्वज्रजित् पुनः ।
शाल्मली वृक्षपुत्रार्थो गरुत्मान् गरुडः पुनः ॥४८॥
पक्षिपर्यायराडर्थो मायुः पुष्कर इत्यपि ।
शिलापर्यायवासार्थः सुधापर्यायहारकः ॥४९॥
कश्यपापत्यपर्याय उलूतीशो रसायनः ।
स्वर्णपक्षः सुमुखसूर्महावीरः खगार्थकः ॥५०॥
नागपर्यायाशनार्थशत्रुपर्यायवाचकः ।
विमानरथकेत्वर्थो विष्णुपर्यायतोऽस्य तु ॥५१॥

---

१ सेना केलिकिलाB २ निरुद्धो ऋषाङ्कB

प्रियोन्नतिरुल्लूती स्यात्पुत्रस्तु सुमुखोऽथ च ।
इन्दिरा चञ्चलार्था स्यान्मा रमा कमलापि च ॥५२॥
[1]पद्मार्थगृहपर्याया हरिपर्यायतः प्रिया ।
भृगुक्षीराब्धिपर्यायपुत्री नारायणीति च ॥५३॥
कंदर्पलोकपर्यायमात्रर्था पद्म[2]लाञ्छना ।
लक्ष्मीर्वृषाकपायी[3]श्रीर्मङ्गला मङ्गलार्थका ॥५४॥
बिल्वद्रुगृहपर्याया [4]करीषिण्यपि पिल्पिला ।
अश्वार्थान्मातृपर्याया पिङ्गला पद्ममालिनी ॥५५॥
(इति [5]द्युस्थानदेवमणिप्रकाण्डः पञ्चविंशः)
कल्पद्रौ केशवकृते [6]स्कन्धे तार्तीयसंज्ञिते ।
यज्ञादिमः प्रकाण्डोऽयं [7]द्वितीयः सिद्धिमागतः ॥५६॥

---

द्वितीयादिविभक्त्येकवचनप्रतिरूपकम् ।
चिराख्यं चिररात्राख्यं चिरार्थप्रतिपादकम् ॥१॥
पुनः पुनः पुनरपि मुहुरेवं मुहुर्मुहुः ।
[8]शश्वच्छाश्वदभीक्ष्णं तु वारंवारार्थवाचकम् ॥२॥

---

१ पद्माद्यB २ लालनाB ३ श्रीमङ्गलाCK ४ करीषिणी पिल्पिप्पिलाB ५ द्युस्थानदेवप्रकाण्डः:CK ६ स्वर्गस्कन्धे तृतीयकेB ७ तृतीय इति स्यात् । सम्यक् संसिद्धिमागतः:B ८ तथा शश्वB

तरसा सपदि क्षिप्रं [1]त्वह्नाय झटिति द्रुतम् ।
तूर्णं द्रागञ्जसा[2]मङ्क्षु स्त्राक् शीघ्रं लघु चित् चन ॥३॥
असाकल्ये समं सत्रा साकं सार्द्धं सहार्थकम् ।
स्यात्प्राध्वमानुकूल्येथ व्यर्थार्थे तु मुधा वृथा ॥४॥
यत्तद्यतस्ततो हेतौ बलवत्सुष्ठु किं पुनः ।
इवाति सु स्युराधिक्ये कदाचिज्जातु जातुचित् ॥५॥
उताहो किं [3]किमूताहो विकल्पे किमुतापि च ।
मिताक्षरग्रन्थजाते तु हि च स्म ह वै किमीं ॥६॥
[4]इञ्चापि [5]पादपूर्त्यै स्युर्विना सांकेतिकात्पुनः ।
अमिताक्षरजाते च वावोह यदपि क्वचित् ॥७॥
वाक्यस्य पूरणार्थास्ते पूजायामति सु द्वयम् ।
मौने तूष्णीं च तूष्णीकं सतम्यर्थे[6] दिवाव्ययम् ॥८॥
दिवसार्थोऽपि तद्वत्स्यान्नक्तं दोषा तथैव च ।
रात्र्यर्थवाचकं [6]चाथ समया निकषा हिरुक् ॥९॥
सामीप्येऽथान्तरे साचि तिर्यगर्थे[7]विवादिते ।
सहसाथाङ्ग हे है भोः प्याट् पाडथ पुरोग्रतः ॥१०॥
पुरस्ता[8]त्पुरतोऽथ स्यात् श्रौषड् वौषड् वषट् पुनः ।
देवताभ्यो हविर्दाने स्वाहापि स्यादथ स्वधा ॥११॥

---

१ त्वह्नाये B २ मंक्षु B ३ किमुताहो CK ४ इश्चापि B ५ पादपूर्त्यां B
६ वाथ CK ७ ऽपि वारिते B ८ त्पुरुतो B

कव्यदाने पितृणां च स्वधा स्याद्प्यथो मनाक् ।
इषदीषत् किञ्चिदपि स्वल्पेथो [1]कच्चथा तथा ॥१२॥
[2]वैवं साम्येथ प्रसह्य हठादथ भवान्तरे ।
प्रेत्यामुत्राथ मध्यार्थेऽप्यन्तरा चान्तरेण च ॥१३॥
अप्यन्तरे च दिष्ट्या स्यादानन्द [3]उपजोषकम् ।
स्थाने युक्तं साम्प्रतं स्यात्सद्यः सपदि तत्क्षणे ॥१४॥
हठे प्रसह्य प्रसभं स्यादभीक्ष्णमनारतम् ।
शश्वच्चाथाप्य मा नो ना मा स्मालं [4]न हि वारणे ॥१५॥
पक्षान्तरे तु यदि चेदद्धा तत्त्वेऽञ्जसापि च ।
प्राकाश्ये प्रादुराविः स्याद्विरोधोक्तौ ननु स्मृतम् ॥१६॥
अङ्गीकारे तु परमं प्रमाणं बाढमेव च ।
अवश्यं परितो विष्वक् सर्वतोऽपि समन्ततः ॥१७॥
अकामानुमतौ काम[5]मसूयोपगमेऽस्तु च ।
निःसमं दुःषमं गर्ह्ये कच्चित्कामप्रवेदने ॥१८॥
मृषा मिथ्या च वितथे [6]यथास्वं तु यथायथम् ।
[7]यथातथमथापि स्यात्प्रागतीतार्थवाचकम् ॥१९॥
[8]संवद्वर्षेऽवरे त्ववागेवं चैवावधारणे ।
अथावश्यं निश्चिते स्यान्नूनं निगपि [9]चैव ते ॥२०॥

१ वद्यथाB २ वैवCK ३ उपलोषकेCK ४ महिB ५ मसूयापगमेCK
६ यथार्थेCK ७ यथा तथा तथापिCK ८ संवद्वषे वर्षे (र्षC) वरे त्ववागेवावधा-
रणेCK ९ चेष्यतेB

आमेवं स्वयमात्मत्वे महत्युच्चैरथाल्पके ।
नीचैरथ स्यादैश्वर्ये तूपर्यध्यथ भूम्नि तु ॥२१॥
प्रायः शनैरद्रुते स्यात् स्मातीते स्तमदर्शने ।
सना नित्ये बहिर्बाह्येथास्ति सत्त्वे रुषोदिते ॥२२॥
उः स्यादुं तु परिप्रश्ने तर्के हुं स्यान्नमो नतौ ।
उषा रात्रौ तदन्ते स्यादथाप्यनुनये त्वपि ॥२३॥
अथ स्याद्दुष्ठु निन्दायां सुष्ठु चापि प्रशंसने ।
सायं साये प्रगे प्रातः प्रभाते निकषान्तिके ॥२४॥
परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ।
अद्यात्राह्न्यथ पूर्वेह्नीत्यादौ पूर्वोत्तरापरात् ॥२५॥
तथाधरा[1]न्यान्यतरेतरात्पूर्वेद्युरादयः ।
अपरेद्युश्चोभयेद्युः परे त्वह्नि परेऽद्यवि ॥२६॥
ह्योतीतेनागतेह्नि श्वः परश्वस्तु परेहनि ।
तदा तदानीं युगपदेकदा सर्वदा सदा ॥२७॥
एतर्हि संप्रतीदानीमधुनापि च सांप्रतम् ।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥२८॥
कल्पद्रौ केशवकृते स्कन्धे तार्तीयके शुभे ।
अव्ययानां प्रकाण्डोऽयं सम्यक् [2]सिद्धिमुपागतः ॥२९॥

---

१ न्योन्यतरेCK २ संपूर्तिमागतःB

अथ [1]स्त्री योनिमत्स्येनावीचीवध्रीतडिन्निशाम् ।
वल्लीशस्त्रीदयाजिह्वाऽवटुतन्द्रानदीदिशाम् ॥१॥
वीणाग्रीवा[2]शिंशिपाद्याचीरी ज्योत्स्ना[3]तिथीत्विषाम् ।
अङ्गुलीकलशीकङ्गुहिङ्गुपत्रीसुरानसाम् ॥२॥
[4]कपिरास्नाशिराकालाशंवा[5]कृष्णोष्णिकाश्रियाम् ।
रोचनासरघाधाय्यास्त्रक्कापण्यातसीभुवाम् ॥३॥
मांसीहरिद्राल्लू[6]दूर्वावलाकाकृष्णलागिराम् ।
यत्तु प्राण्यङ्गवाचि स्यादीदूदेकस्वरं कृतः ॥४॥
पात्रादिवर्जितादन्तोत्तरपदः समाहारे ।
द्विगुरत्रावन्तान्तो वाऽन्यस्तु सर्वो नपुंसकः ॥५॥
[7]लिन्मिष्टनिर्णयणि स्त्र्युक्ताः क्वचित्तिङल्पह्रस्वकम् ।
विंशत्याद्याशताद्द्वन्द्वे साचैक्ये द्वंद्वनेपशो ॥६॥
लता गीतिस्त्रुचो भेदे ध्रुवाविटः प्रजाविशोः ।
घटीभबन्धयोर्वारी दुन्दुभावक्षविन्दुषु ॥७॥
क्ष्वेडा वंशशलाकायां वाद्यभेदे तथा ध्वनौ ।
गृह्या शाखापुरे प्रान्तेन्तिका कीला रताहते ॥८॥
महत्यर्थे त्वरण्यानी हिमानी यवनान्यपि ।
लिप्यां दोषे यवानी स्याद्रज्जौ रश्मिः सुरागृहे ॥९॥

---

१ स्त्रिCK २ शिंशपाB ३ तिथिधियाम्B ४ अपिB ५ कृष्णोष्टिकाB
६ लूदूर्वेति सर्वत्र पाठः ७ लिमन्यृC

फलपाकगृहे गञ्जाप्यथाहंपूर्विकादिका: ।
मघाश्रपक्तिका त्वर्षाः स्युर्बहुत्वे निरन्तराः ॥१०॥
वा बहुत्वे त्वप्सरसः सिकताः सुमनः समाः ।
गायत्र्युष्णिक्प्रभृतयश्छन्दोभेदास्तथाष्टकाः ॥११॥
स्या[1]दह्लूकेष्टकेषीकोल्कोर्मिका कुञ्जिकेन्धिका ।
कनीनिका च कलिका कणिकापि च कूचिका ॥१२॥
कूर्चिका कोशिका केका कोणिका च [a]कृपाटिका ।
स्या[2]त्पच्चिका कञ्चुलिका ततोऽपि च गवेधुका ॥१३॥
जलौका झिरुका टीका त्रिका[3]दूषा कृपा स्मा ।
धूका च ध्रुवकानीका पादुका च पताकया ॥१४॥
स्यात्पाचिका पूपलिका पंचिकापि च पिंडिका ।
[4]पर्यस्तिका बृहतिका मानिका मिहिका तथा ॥१५॥
मच्चिका[5]चापि मूका स्याद्वाका तद्वद्विपादिका ।
धालुका शिविका[6]न्यूका शम्बूकापि च सर्जिका ॥१६॥
संवर्त्तिका हसनिका स्त्रविका च हसन्तिका ।
परिखोखा शिखा शाखा विशिखा च सुरङ्गया ॥१७॥
भङ्गा जङ्घा च सरघा वचा चिञ्चा यदृच्छया ।
कच्छा पिच्छा भुजा पिञ्जा स्यात्तुल्या प्रजया स्वजा ॥१८

१ दनूके B a चपाटिका B २ त्पह्लिका B ३ दूषांकया C दूषिकया B ४ प्रयंस्तिका C
५ चापियूका B ६ मूंका B

झञ्झा यात्रा घटा घोटा घण्टा घाटा छटा जटा ।
स्यात्पोटा भिस्सटोर्णा च करुणाघोणया घृणा ॥१९॥
तूणा तृष्णा दक्षिणापि धिषणा वीणया समा ।
[1]स्थूणा स्थूणामृतानन्ता गीता चिन्ता चिता समा ॥२०॥
[2]त्रिवृता तृणता त्रेता मार्जिता सह मुक्तया ।
लूता लता च लिखिता वार्त्ता सीता सिता तथा ॥२१॥
गाथा कन्था कुथा तद्वद् गदा स्यादजमोदया ।
मर्यादा चानुराधेक्षुगन्धा गोधा च राधया ॥२२॥
तुल्या सुधा स्वधा धाना रास्ना सूना[3]कृपापि च ।
झञ्झा[4]पंपा प्रपा तद्वद्वपा शंपा शिफाथ च ॥२३॥
कबा भंभा समा रम्भा सभा हुंभा ततोप्युमा ।
अमामा प्रतिमा यामा रमा [5]वामेत्यया समा ॥२४॥
उपकार्या तथा कुल्या कक्ष्या चित्या च छायया ।
इष्मा नस्या च पर्याप्या पर्याण्या च मायया ॥२५॥
मङ्गल्या रथ्यया तुल्या शस्या संध्यार्द्रया समा ।
[6]कजेराक्रुसरेर्वारुः क्षुद्रा गोत्री च कंधरा ॥२६॥
[7]धारा परंपरा गुन्द्रा छत्रा दंष्ट्रा च भस्त्रया ।
प्रतिसीरा च मथुरा मात्रा भद्रा च मन्दुरा ॥२७॥

---

१ स्थूणा B २ त्रिवृता तृणतात्रेतामार्जितेति K पुस्तकेनास्ति ३ क्षपा B ४ संपा B
५ चामेज्यया सह B ६ कंदरा क्रकरेर्वारा B ७ धारा पारा गुहा गुन्द्रा B

सुरा[1]पात्री वरत्रा च वागुरापि शिरोधरा ।
स्रग्धरा शर्करा होरा शिराह्वारोपलेलया ॥२८॥
कला[2]कुदाला गोला च ज्वाला दोला मनः शिला ।
लाला वेलावला शाला शिला शाकुलया समा ॥२९॥
मेला माला मेखला स्याद्रसाला लालया समा ।
सुवर्चला सिध्मलापि हेलया सर्वेला समा ॥३०॥
[3]खट्वा ग्रीवा तथा दूर्वा लट्वा [4]सारिवया शिवा ।
कशा श्विवा [5]कुशेशापि दशेषामित्तया समा ॥३१॥
स्याद्राक्षा कांक्षया कक्षा मूषा मञ्जूषया समा ।
लाक्षा लिक्षा च शेमूषा स्नसा स्या[6]द्रूस्नया समा ॥३२॥
वाह्वा स्वाहा गुहा भङ्गी वसतिर्विपणी द्युतिः ।
पेश्यायनी त्रोटिनाभ्यौ [7]नालिर्वासिश्च वर्वरिः ॥३३॥
[8]वालिः कालिर्भल्लिपल्ली व्रतती भ्रुकुटिर्वमिः ।
[9]सारिर्भाटी[10]सठिर्वर्त्तिःखाटिः शुण्ठी कृमिः कृषिः॥३४॥
स्याद्वितर्दिस्तिरीतिश्च दर्विर्नी[11]विश्छविर्लेविः ।
राजिर्जातीरुचिः श्रेणी सूचिः साची खलिः खनिः ॥३५॥
[12]खानिः खारी [13]कालिरूली वापी धूली लिपिर्लिविः ।
हिण्डी स्थाली सुटिर्वेदी कुक्कुटिः काकलिः किकिः ॥३६॥

---

१ यात्राB २ गुहालाB ३ खवाCk ४ सरिवयाB ५ कुशेशापिB ६ द्रूस्तयाB ७ वालिर्वासिश्च चर्चरीB ८ फालिर्भालिर्बल्लिB ९ सारिB १० सटिB ११ श्छवी-लिपिःB १२ स्वानिः १३ कीलितूली चापि चापि धूलिर्लिपिर्लविःB

[1]छेदिर्नान्दी शुक्तिशुक्ती कवि[2]र्नाडिः किखि[3]र्द्युतिः ।
अतिः सादिर्वेटिः कोटिर्विंष्टिर्गृष्टिर्देरियु[6]जिः ॥३७॥
वल्लरी काकिनी वीथी परिपाट्या रविः क्षुरिः ।
[4]मज्जरिर्लहरिर्भेरी राटि[5]राठिभु[6]शुण्ड्यपि ॥३८॥
[6]भाटी पिण्डिः शरारिश्च गानिः कानिः फलिर्जनिः ।
[7]वारिर्हानिः प्रधिः कंविः[8]चुल्हिश्चण्डिस्तरिः शनिः ॥३९॥
मरिर्मारी रतिः शाणी शान्तिर्मेन्यश्निरोषधी ।
विद्रधिर्झल्लरिः सारिः शिरोधिः कवरी कविः ॥४०॥
ह्लादिनी स्वेदिनी कीर्त्तिरपदो हरणी स्थगी ।
कर्त्तरी[9]ल्पशमरी तद्वत्प्रतोल्यक्षवती[10]ब्रुसी ॥४१॥
[11]काण्डी करीरी खण्डाली कृपाणी कदली घटी ।
कर्परी घर्घरी गोणी हसन्ती गृध्रसी[12]मसी ॥४२॥
खल्ली पलाली [13]पन्नध्री तिलपर्ण्येषणी द्रुणी ।
[14]गन्धोली मातली नध्री [15]केवली काकली खटी ॥४३॥
गोष्ठी वानी रसवती [16]मत्स्यण्ड्या सह दामनी ।
कस्तूरी सिञ्जिनी मौर्वी चौरेय्यपि च देहली ॥४४॥

---

१ छिन्दिB २ नाभिः:B ३ पुंतिःB ४ मतरिर्बजमिर्भेरीCK ५ राष्टिB ६ भाटिःC माटिःB ७ चारिर्दातिःB ८ चुल्लिश्चण्डिस्तरिनिंचिःB ९ ल्प इति सर्वत्र पाठः कर्तरील्यश्मरी इति स्यात् १० वृसीB ११ कण्डीB १२ मदीCK १३ यमूर्ध्नीCK १४ गन्धाला सातलीB १५ केचष्णीCK केवल्लीC १६ मत्स्याण्ड्याB

शष्कुली च चमूर्दद्रूः कर्णान्दू[1]रक्तुरित्यपि ।
कच्छूस्तनूर्गौः प्रियङ्गुश्चञ्चुस्तापुर्जुहूस्ततः ॥४५॥
सीमन् शरद् दृशद्दक् दृशास्त्रक् त्वक् स्फिग्द्वार्धुरौ च नौः।
द्यौर्दिव् प्रावृट् त्विट् तृषौ [2]दिगेषेति प्रकृतिः [3]स्त्रियः ॥४६
पुंल्लिङ्गमृतुहस्तौष्ठ[4]कोष्ठाधूनां नखस्य च ।
कपोलकेशदिवस[5]रसानां स्तनगुच्छयोः ॥४७
निर्यासगुल्फकेशानां पतद्ग्रहकुठारयोः ।
रथाशनिश्वेत[6]कण्टकफासीनामरेरपि ॥४८॥
वोलप्रवालमुरजद्विपाना[7]मभ्रपङ्क्त्योः ।
[8]सेवध्यम्बुधिमन्थानां विषयस्याशुगस्य च ॥४९॥
[9]शोणमासद्रुमादीनां धान्याग्न्यध्वरदेहिनाम् ।
महतां [10]सभिदां नाम मानहायनयोरपि ॥५०॥
तथावप्राछवर्हाणामनुवाकाङ्करक्तकैः ।
[11]सनक्तवैः पुंखरङ्गसमुद्गानां भगस्य च ॥५१॥
अपाङ्ग[12]मङ्गवेगानां वर्गस्यार्घाघयोरपि ।
गञ्च [13]पुच्छ गच्छ पिच्छ कलिञ्जपुञ्जयोरपि ॥५२॥

---

१ रज्जुB २ द्विगेषेतिCK ३ स्त्रियाम्B ४ कोघाCK कोष्ठान्धूनामिति स्यात् ५ ससानांC ६ कटB ७ मर्चCK ८ शेवध्यB ९ शोणामरB १० समिदानायK सनिदानामC ११ सनक्तकैःBC १२ भङ्गB १३ पुछगछपिंछB

[1]मुञ्जवाजाजावटानां तथा[2]पट्टप्रकोष्ठयोः ।
कोष्ठाङ्गुष्ठघटानां च प्रगण्डस्य [3]गुडस्य च ॥५३॥
कूष्माण्डगण्डलगुड [4]करण्डानां ततः पुनः ।
[5]वरुडस्य पिचण्डस्य भ्रूणस्य च गुणस्य च ॥५४॥
नाडीव्रणोत्पातपोतव्रातानां पृषतस्य च ।
कुन्तालक्तक [6]पिष्टातार्षानां जनपदस्य च ॥५५॥
कपर्दगदयोस्तद्वद्दगदस्य गदस्य च ।
वुद्बुदागाधस्कन्धार्द्धगन्धानां फेनचिह्नयोः ॥५६॥
अनातोद्येऽपि च घनः शब्दे ध्वानस्वनौ ततः ।
[7]जताह्वामिजनानां च देवनेन समं पुनः ॥५७॥
स्यात्परि[8]धानतस्यापि कलापसूपयोरपि ।
[9]स्तूपापूपशोफशेफनितम्बस्तम्बयोरपि ॥५८॥
स्या[10]च्छन्दतिष्यपुष्याणां पाञ्चजन्य[11]निकाय्ययोः ।
सिचयामित्रमित्राणां तद्वद्[12]वृत्रकटत्रयोः ॥५९॥
पुण्ड्रकल्लोलतल्लानां गलहिङ्गुलयोरपि ।
खलोल्लोलपोटगलरुण्डोलानां………… ॥६०॥

---

१ भुजवाजावटानां चB २ पदB ३ गुडस्येतिK पुस्तके नास्ति ४ करआनांB कडानां चC ५ वरण्डस्यB ६ पिष्टानां तथाC ७ तत्ताह्वामिजनानांC जनोह्लासांजनानांB जनाह्लाभिजननानामिति स्यात् ८ घातेनस्यापिB ९ सूपाCK १० स्छंवB ११ भिकाययोB १२ छत्रB

..........................कालपुद्गलयोरपि ।
[1]गोलाजगलवालानां तद्व[2]त्कामलतालयोः ॥६१॥
कुद्दालस्य निचोलस्य [3]वारुलपत्रवालयोः ।
स्या[4]द्बाहुलदेवलयोर्जटिलस्य शिवस्य च ॥६२॥
आदीनवावयवयोर्दावमाधवयोरपि ।
पणवध्रुवहावानां पुरोडाशांशयोरपि ॥६३॥
[5]उडीशकुशकोटीश[6]कुल्मापाणां वृषस्य (च) ।
[7]यज्ञनिर्यू[8]हकलह[8]निःकुहाहसनस्ततः ॥६४॥
नरासिरा[9]शिवमतिदुन्दुभीनामृषेरपि ।
वृष्णिपाण्यञ्जलिज्ञातिगिरीणां कलिना सह ॥६५॥
[10]अविराजिध्वनिशिशुकर्पू[11]जायुयुजामपि ।
हाहाहूहू[12]नम्रहूनां [13]गमत्पां[14]दश्मनामपि ॥६६॥
स्थेमोष्मपक्ष्मणामात्मपाप्मनोर्मातरिश्वनः ।
कठणथपभोपान्ता यय्यदन्ता अमी पुनः ॥६७॥
मभयरषसोपान्ता गोत्राख्याचरणाह्वयाः ।
नाम्न्यकर्त्तरिभावे च [15]द्व्यजज[16]ञ्न्यड्णघाथुचः ॥६८॥

---

१ गोपालाB २ कमलB ३ वारूलB ४ द्वअुलB ५ उडीशB तुडीशC ६ कल्माषाणांB ७ यत्तB ८ निःकुहारुस्ततः पुनःB ९ शिवामांतB १० आचाराजिB ११ जानुB तायुC १२ नम्रहणांCK १३ गमत्यांC गसत्याB १४ दारमनाB १५ घमपूपूकणथाथुचःB १६ ञ्नक्C

स्युः कर्त्तरीमनिञ्भावे को घोः किः प्रादितो[1]न्यतः ।
द्वन्द्वेऽश्ववडवा[2]वश्ववडवं तत्समाहृते ॥६६॥
[3]बर्हेश्छदे बर्हिरग्नौ ब्रीहिभेदे तु हायनः ।
मस्तुः सक्तौ[4]वर्हिर्वत्रे स्यादच्छः स्फटिकेऽपि च ॥७०॥
नीलो मणौ रवौ मित्र[5]स्तलस्तालचपेटयोः ।
[6]कोणे ऽश्रिश्वषकोऽशोको नाभिः क्षत्रियवेधसोः ॥७१॥
इति पुंसः प्रकृतयः स्युरेतेऽथ नपुंसकम् ।
तलस्तु तालसंयुक्तो[7]रुजुपान्तं ततःपुनः ॥७२॥
वेधश्रादीन्विना सान्तं द्विस्वरं मन्त्रकर्त्तरि ।
धनरत्नभोम्नानां मनसो घुसृणस्य च ॥७३॥
[8]शुभावद्यहृषीकाणां शुक्रस्य जल[9]पुष्पयोः ।
दलांशुकमनोदारुविलपिच्छधनुर्युधाम् ॥७४॥
सुखदुःस्वत्वचरुचहलताल्वस्थिहिङ्गुनाम् ।
भेषजागुरु [10]सूक्ष्माणामपि तुत्थकुसुम्भयोः ॥७५॥
शिलाभवान्तिकदृशां सिध्मवल्कलयोरपि ।
यकृन्मरिचनलदसौवीराणां तथाऽसृजः ॥७६॥
[11]क्षौमधौतेयकह्लारफेनानां लवणस्य च ।
[12]प्रसूनव्यजनस्थानद्रवन्नामानि यानि च ॥७७॥

---

१ म्यतःB २ वाश्यB ३ बर्हच्छदेB ४ वहीत्रध्रेB ५ स्तलुस्तालुB ६ कोणाश्रिश्वषकोशोकोCK कोणोरश्वषको लेशोB ७ रुरुयातंB ८ शुभापहद्वृषीकाणांCK शुभावद्य हृषीकाणामिति स्यात् ९ पूथयोःB १० सूक्ष्मानांKC ११ ब्योमB १२ प्रसूनमभ्यम्यजनस्थाननामानि यानि चB

पुरसद्माङ्गयोः शीर्षछत्रयोः पुंडरीकके ।
मधुद्रवे ध्रुवं शश्वत्तर्कयोः खपुरं[1]घटे ॥७८॥
[2]अपूर्वदैवकार्यादौ युगं दृष्टं तथा कटु ।
[3]असेद्द्वृद्धः स्थले धन्वारिष्टमद्रुमपक्षिणोः ॥७९॥
धर्मं दानादिके तुल्यभागेर्द्धं ब्राह्मणं श्रुतौ ।
न्याय्ये सारंपद्ममिभबिन्दौ काम[4]मनुमतौ ॥८०॥
खलं भुवि तथा लक्तं वेध्येऽह्नः सुदिनैकतः ।
भूमौ संख्यात[5]एकार्थे पथः संख्याव्ययो[6]त्तरः ॥८१॥
द्वन्द्वैकत्वाव्ययीभावौ क्रियाव्ययविशेषणे ।
कृत्याः क्तान्ताः खलनिजभावश्चात्वदिः समूहजः ॥८२॥
गायत्र्याद्यरास्त्वार्थे व्यक्तमथानञ् कर्मधारयः ।
[8]तत्पुरुषो बहूनां चेच्छाया शाला विना सभा ॥८३॥
राज[9]वर्जितराजार्थराक्षसादेः परापि च ।
[10]आदा उपक्रमो यज्ञे कन्थोशीनरनामनि ॥८४॥
सेनाशाला सुराछायानिशंचोर्णा शशात्परा ।
[11]भाभूणो गृहतः स्थूणा संख्याऽदन्ता शतादिका ॥८५॥
शाल्मकपुष्प[12]कानूकमौक्तिकानां त्रिकस्य[13] च ।
छात्राकशल्कचिबुककुतुकानां ततोऽपि च ॥८६॥

---

१ खटेKC २ अपूपCK ३ असेद्वन्द्वंB ४ मनोर्मतौB ५ एकार्थB ६ त्तरम्B
७ कृत्यक्तानां खलूनिङ्भावश्चात्मादिसमूहजःB ८ तत्पुरुषेB ९ वर्जितंCK
१० आदावुपB ११ भारणोB १२ कारूकCK १३ वाCK

माक्षिकालीकधान्याकतोकानां सौतिकस्य च ।
[1]तित्तिडीकक्रीतकयोः [2]कञ्चुकोलुकयोरपि ॥८७॥
[3]माध्वीकनिम्बकल्कानां कवकालिकयोस्तथा ।
स्यान्नाटक भाणकयोस्तोटकाह्विकयोरपि ॥८८॥
हलीमकरूपकयोः खण्डकस्य ततः पुनः ।
स्याज्जालकवेणुकयोर्[5]वैंटिकान्वितयोरपि ॥८९॥
वास्तुकोपसूर्यकयोः कारकनिःशलाकयोः ।
प्रकीर्णकशीर्षकयोः कुहकमधुपर्कयोः ॥९०॥
तद्वच्चित्तकरुचककुलकानां स्फिगस्य च ।
स्वलिंगांग [6]प्रगानां च तद्वत्स्याच्चोचपिञ्जयोः ॥९१॥
बीजारिष्टघुटेष्टानां ललाटव्युष्टयोरपि ।
कृपाटपिष्टशृङ्गाटकरोटानां............॥९२॥
........................तथा मेरटघृष्टयोः ।
.......गोष्ठाण्डतुण्डानां प्रवणस्येरिणस्य च ॥९३॥
[7]पिङ्गाणतीक्ष्णद्रविण[8]पुराणानामृणस्य च ।
घ्राणपर्याणहरिणलवणानां शणस्य च ॥९४॥
परायणो ल्पशरणकार्मणानां ततः पुनः ।
[10]त्रुस्यधोरण[11]भूतानां निशान्ताश्मन्तयोरपि ॥९५॥

---

१ तित्तीकCK २ कंचुकोलूकयोरपिB ३ माध्वीकB ४ नाणकB ५ वैंटिB ६ प्रगानानांB ७ सिङ्घाणB ८ पुराणानां रिणस्य चP ९ ष्ठुC ष्णाB १० त्रुणाB ११ भूतानांCK

स्या[1]द्वीतवृन्ततूस्तानां [2]तुत्थवाहित्थयोरपि ।
[3]गोधाछोदकुसीदानां कुसिदास्यदयोरपि ॥९६॥
वृन्दतुन्दपदानां च निम्नस्य शिल्पतल्पयोः ।
पुष्पान्तरीपकूर्माणां त्रिविष्टपपरीपयोः ॥९७॥
रूपस्य निकुरम्बस्य तद्वच्छुल्वकुटुम्बयोः ।
स्यात्तलभप्रसभयोस्तथैव युग्मतोक्मयोः ॥९८॥
सूक्ष्मस्य किलिमस्यापि तथैव तलिमेर्मयोः ।
तिग्माध्यात्मशुष्म[4]धाम्नां शयनीयत्रिसंध्ययोः ॥९९॥
सायेन्द्रियकिशलयखेयद्रुवययोरपि ।
भयद्वापरयोः चेत्रसत्रयोरजिरस्य च ॥१००॥
[5]शृंगवेराम्र[6]तीराणां पुष्करागारयोरपि ।
नागरो[7]त्तरयोः स्फारशूरयोः क्दरस्य च ॥१०१॥
ककुन्दर[8]प्रान्तरयोः स्या[9]दौशीरकुटीरयोः ।
अपि सिन्दूरमण्डूरशिविराणा[10]मरस्य च ॥१०२॥
चामरक्रूरदूराणां स्यात्कलेवरवेरयोः ।
खुरोलूखलपातालयौतवानां दिवस्य च ॥१०३॥
सान्त्वसत्त्वार्त्तवानां च तद्वत्स्यात् किण्वविश्वयोः ।
तथा[11]दृषस्य कुलिशस्यार्शिस्यामिषस्य च ॥१०४॥

---

१ द्वातCK  २ तुस्पथाहित्थयोCK  ३ गोदाB  ४ धाश्नांC  ५ भृगCK
६ नीराणांB  ७ तरयोःB  ८ श्रान्तरयोःB  ९ दौसीरCK  १० णां गरस्य चB
११ दशास्यC वृषस्यB

शीर्षमन्दाक्षपीयूषकिल्विषाणां ततःपरम् ।
[1]तर्षजीषक्मृषाणां च काशीसस्य तथैव च ॥१०५॥
····काशीसवत्सानां तथैव साध्वसस्य च ।
महानससाहसयोः प्रियालोरपि[2]सच्छ्रितः ॥१०६॥
तुम्बरुस्वादुयातूनां मालुताल्वोरनन्तरम् ।
कसेरोश्च शलालोश्च ललामजगतोरपि ॥१०७॥
भसत्संपत्ककुत्पर्वमहद्बृषत्पुरीततान् ।
स्याद्रोम्णोऽह्न इतीहोक्ताः क्लीबप्रकृतयोऽथ तु ॥१०८॥
[3]पुंसि स्त्रियां च शङ्कुः स्यादङ्कस्थाने चतुर्दशे ।
निरये दुर्गतिः कक्षो दोर्मूले गर्त आकरे ॥१०९॥
स्याद्वाणपिप्पलौ वृक्षे नाभिर्वृन्ते तु वष्मणः ।
बलिरर्थविशेषेपि प्रधिर्नेमौ कुटो गृहे ॥११०॥
श्रोण्यौषध्योः कटो मोहे भ्रमः [4]कुम्भो घटेऽपि च ।
वृन्दागोलकयोः पिण्डः स्फुलिङ्गलेशयोः कणः ॥१११॥
भकनीनिकयोस्तारो वराटो रज्जुशस्त्रयोः ।
[5]भेऽश्लेषहस्तश्रवणाः मेरुजम्ब्वां सुदर्शनः ॥११२॥
यष्टयर्कांशु[6]समुद्रेषु तरणिर्भूपदेयके ।
भागधेयः करेणुस्तु करिणीकरिणोरपि ॥११३॥

---

१ तषजीपरजीषाणांB २ सकथितः (सक्थियतः B) ३ पुंसि क्लीबे चेति सर्वत्र पाठः । ४ कुम्भेB ५ भाश्लेषB ६ समुद्गेषुCK ।

लाजावस्त्रदशा[१]भूम्नी दाया: प्रत्ययभेदतः ।
अल्पाख्यापत्यवचनतद्धितस्तिन्दुकस्य तु ॥११४॥
चर्मप्रसेवकस्य स्या द्[२]घुटिकस्य ततोऽपि च ।
शुण्डिकस्य सल्लकस्य शल्यकस्याप्यनन्तरम् ॥११५॥
वृश्चिकस्य चुलुकस्य [३]स्याद्धुडुक्कतुरुष्कयोः ।
पिपीलकस्य शुङ्गो[४]घलम्बानां भुजशाटयोः ॥११६॥
सृपाटसटकीटानां स्यात्किराटचपेटयोः ।
किट[५]स्फटघटानां च तथा [६]वर्वटकैटयोः ॥११७॥
[७]फडचुडगुडानां च तथैव फणशाणयोः ।
वारिपर्णस्य गर्त्तस्य रथाजमोदयोरपि ॥११८॥
विधकूपकलम्बानां जित्यस्य सहवध्रथा ।
सहचर[८]मुद्गरयो[९]र्हीरस्य कृशरस्य च ॥११९॥
नालिकेरस्य शारस्य [१०]बहुकरकुठारयोः ।
स्यान्म[११]सूरशफरयोर्वल्लरस्य ततः पुनः ॥१२०॥
कीलरालपटोलानां तथा कम्बलभल्लयोः ।
[१२]दंशगण्डूषरभसलालसानां ततोऽपि च ॥१२१॥
[१३]विघसस्य वृत्तिकुटिवितस्तीनां कुटेरपि ।
[१४]ऊमीशमीमेथिमेधिमसीनां पाटलेरपि ॥१२२॥

---

१ भूम्नीदाया:C भूम्निदाछा:B २ द्वुदिकस्यB ३ स्याद्ध दुष्करपृष्टयो:B ४ पल-बानांB ५ स्फुटB ६ पर्यंटB ७ फटचुंटB ८ मुहरयोB ९ र्हरिस्यCK १० षङ्क:B ११ न्मयूरB १२ वंशाB १३ वेघसस्यCK १४ उमीB

मषीषु[1]धृत्यहिजटिजाटलीनां सृणेरपि ।
मरीच्यशनिमौलीनां हलीकेल्योर्मणेरपि ॥१२३॥
ईर्वा[2]र्वेवटुसिन्धूनां मनोभृत्योर्हरेरपि ।
[3]लव्यणिश्रेणिपर्णीनां गव्यूती [4]रश्मिवाचिनाम् ॥१२४॥
पालिश्रोण्यरणीनां च विष्टिमुष्ट्योर्मुनेरपि ।
स्वातिशाल्मलि[5]योनीनामाणिवस्त्योस्ततोऽपि च ॥१२५॥
कर्कन्ध्वाखूहनूनां च कन्दुना सहगामिनाम् ।
इति स्त्रीपुंसप्रकृतिरथ स्त्रीक्लीबयोर्नखम् ॥१२६॥
शुक्तौ विश्वं च मधुकमौषधे लक्तमित्यपि ।
षष्ठेङ्कस्थानके कल्पं क्रोडोङ्के तिन्दुकं [6]फले ॥१२७॥
[7]यवाक्यं तरलं पुष्पे पाटलं तरलं च ये ।
वसन्ततिलकं वृत्ते कपालं भिक्षुभाजने ॥१२८॥
[8]अर्द्धपूर्वपदोनावाद्यनकर्त्तनटौ क्वचित् ।
चौराद्यमनोज्ञाद्यकञ् कथानक[9]कशेतके ॥१२९॥
वक्रोष्ठिकवंशिकयोस्तथैव कच[10]कुल्वयोः ।
पीठभक्तावहित्थानां सहैवाच्छोटनेन च ॥१३०॥
रशनारसनाभ्यां च शंवतुंव महोदयैः ।
मृगव्यकांस्यवीर्याणां वाष्पवाणिज्ययोरपि ॥१३१॥

---

१ कृत्यपिहिजाठरीनां B २ वंबुंद B ३ ह्येलेणि B ४ रश्सवीच्चिनाम् CK ५ योनीनां मणि B ६ बले B ७ यवाग्रं (ग्वां) B ८ अर्द्धपूर्वपदोनाचाप्यनकर्तनटौ CK अर्द्धपूर्वपदोनावाद्यानुकर्तनटो B ९ कशोरुके CK १० कुब्जयोः K कूचयोः B

रयाद्गात्रापरनासीरमन्दिराणां ततः परम् ।
मयूरकादम्बरयोः शस्त्रस्य नगरस्य च ॥१३२॥
सत्तीरस्य तमिस्रस्य स्थालीकाहलयोरपि ।
कदलीयुगलीजालस्थलानां पित्तलस्य च ॥१३३॥
गोलावडिशयोश्छर्दिजम्ब्वलावूषसामपि ।
गुणदामार्चिसदसां सरसां चोडुना सह ॥१३४॥
तयडा मयडा तद्वदिति स्त्रीक्लीबयोरथ ।
पुंक्लीबयो[1]रब्जसंख्ये तद्वत्पद्मोऽब्जसंख्ययोः ॥१३५॥
कंसोऽपुंसि कुशो बर्हौ बालोह्रीवेरकेशयोः ।
द्वापरः संशये छेदे पिप्पलो [2]विटपोऽतरोः ॥१३६॥
अब्दो वर्षे [3]दरस्त्रासे कुकूलस्तु तुषानले ।
स्या[4]ज्जन्यस्तु परीवादे पर्यङ्के तल्पइत्यपि ॥१३७॥
उष्णो धर्म[5]स्तपो माघे हृदि वत्सो वरो भवेत् ।
तुल्ये गोले च भक्ष्ये च वर्णः शुक्लादिकेषु च ॥१३८॥
[6]अकारादौ संपरायो रणे लोणे तु सैन्धवः ।
भूतः प्रेते तमो राहौ शुक्रः स्यादग्निमासयोः ॥१३९॥
स्वदायोक्तस्वरे कृच्छ्रं व्रते तु स्याच्छदे दलः ।
कर्पूरस्वर्णयोश्चन्द्रः स्याद्वृत्तश्चन्द्रयोषिति ॥१४०॥

---

१ रज्व CK २ विध्यनन्तरे B ३ रवस्त्रासे B ४ जल्पस्तु B ५ स्तपा B ६ अकराद्यौ CK

धर्मः स्वभावे रुचको भूषाभिन्मातु[1]लुङ्गयोः ।
पाताले वाडवो वध्रः सीसश्चामलकः फले ॥१४१॥
[2]पिरजंगलसस्वातिपिटकामांसजन्तुषु[3] ।
मधुपिण्डौ सुरातन्वौ नाम सेवालमध्ययोः ॥१४२॥
एकाद्रात्रः समाहारे तथा सूतकुकूलको ।
वलीकवैनीतकयोस्तद्वद्भ्रमरकस्य च ॥१४३॥
वल्कवल्मीकमरककल्कानां पुलकस्य च ।
करकस्य व्यलीकस्य पङ्कवर्चस्कयोरपि ॥१४४॥
स्यान्मंणिकस्तबकयोर्वितङ्कैङ्कयोस्ततः ।
तटाकचूचकाभ्यां च तडाकेन सहैव च ॥१४५॥
वालंकालकतङ्कानां निष्कतालकयोरपि ।
स्यान्मूलकफलकयोस्तिलकान्दुकयोस्ततः ॥१४६॥
कोरकालीककरकपानकानां समन्ततः ।
विशेषकस्य चषककंठाकाभ्यां ततोऽपि च ॥१४७॥
स्याच्छाटककुन्दुकयोर्नाकमञ्चकयोरपि ।
विटङ्कशाकयोः सत्रा मेचकेन ततोऽपि च ॥१४८॥
पुस्तकेन पिभाकेन तथैवमुस्तकेन च ।
मस्तकस्य वर्णकस्य मुक्कमूषिकयोरपि ॥१४९॥

---

१ लिङ्गयोःCK २ पिटमङ्गलसत्त्वानां ३ जन्तुष्वित्यनन्तरमेव B ( Baroda ) पुस्तकं समाप्यते । इति कल्पद्रुकोशः समाप्तः इति च तत्र लिखितम् ॥

[1]स्यान्मस्तिकमोदकयोस्तथा तरण्डकस्य च ।
स्याच्चण्डातकपिण्याकातङ्करोचककञ्चुकैः ॥१५०॥
समं चेरकशूकाभ्यां शंखस्य मखपुंसयोः ।
मुखस्य चाधिकाङ्गस्य संयुगस्य भगस्य च ॥१५१॥
स्यात्पद्मरागायुगरुद्योग [2]शृङ्गारयोस्ततः ।
टंगस्य च निदाघस्य कूर्चक्रकचयोरनु ॥१५२॥
कवचार्द्धर्चयोः पुच्छकच्छाच्छानां व्रजस्य च ।
निकुञ्जोटजकुञ्जानां तथैवापुञ्जभूर्जयोः ॥१५३॥
स्याद्ध्वजमलयजयोः कालकूटारकूटयोः ।
स्यात्कवटकपटयोः खेटकर्पटयोस्ततः ॥१५४॥
पिष्टलोष्टतुराणां च सहैव निकटेन च ।
मुण्डमण्डाण्डचूडानां दृढस्य श्रवणस्य च ॥१५५॥
कार्षापणपकणयोर्वारवाणापराह्णयोः ।
वाणस्य कङ्कणद्रोणसुवर्णानां तृणस्य च ॥१५६॥
दूषणस्वर्णवृषणव्रणानां भूषणस्य च ।
भाण्डवरचूर्णानां किण[3]तोरणयोरपि ॥१५७॥
निकेतपूर्त्तयोस्तद्वच्युत[4]प्रयुतयोरपि ।
पारतान्ततयोरैरावतक्ष्वेडितयोस्ततः ॥१५८॥

---

१ म्मस्तिक C २ शृङ्गयोरितिमूले पाठः ३ तोरष्टयोरिति मूलपाठः ४ प्रयुतयोरिति मूलपाठः ।

हस्तोपवीतपलितवृन्तानां दैवतस्य च ।
लोहितव्रतबुद्धानां वसन्तध्वान्तयोरपि ॥१५९॥
मुहूर्त्तरतमुस्तानां शतस्यैवायुतस्य च ।
द्यूतपुस्तघृतानां च वरूथप्रस्थयोरपि ॥१६०॥
गूथ[1]यूथमोथतीर्थपुलिन्दानां ततः पुनः ।
ककुदाम्बुदयोः कुन्दपदयोः ककुदस्य च ॥१६१॥
पट्टदोहदयो र्नादमुदयोः छादकुन्दयोः ।
कुमुदायुधोत्सेधानां कबन्ध[2]श्रामयोरपि ॥१६२॥
अंधसौधौषधानां च राजादनवितानयोः ।
शिश्नचन्दनमौनानां गन्धमादनपीनयोः ॥१६३॥
यौवनालग्ननलिनप्रस्फोटनपिधानयोः ।
पुलिनाशनयोस्तद्वदुदपानसमानयोः ॥१६४॥
केतनासनयोर्वर्द्धमानस्य च दिनस्य च ।
ओदनस्थानयोस्तद्वच्छतमानविमानयोः ॥१६५॥
हायनस्तेनमानानां तथैव धनमानयोः ।
मानताडनयोरस्तोद्यानयोर्निधनस्य च ॥१६६॥
निपानवातायनयोरभिधानखलीनयोः ।
भुवनस्य रसोनस्य खलिनस्य ततोऽपि च ॥१६७॥

---

१ यूथयूथेतिमूलपाठः । २ श्रायोरिति मूलपाठः ।

भवनस्यानुमानस्य लशुनस्य ततः पुनः ।
गृञ्जनस्यापि शयनद्वीपयोः कुतपस्य च ॥१६८॥
चापावायस्तूपसूर्यकुणपानां तिपस्य च ।
विटपोडुपशष्पाणां मण्डपद्वीपयोरपि ॥१६९॥
वष्पविष्टपयोश्चापि तथैव शफबिम्बयोः ।
डिंभजम्भकुसुम्भानां निभस्य कलभस्य च ॥१७०॥
ककुभस्यार्मघस्रामसंक्रमाणां हिमस्य च ।
कामहेमललामानामुद्यामोद्यमयोरपि ॥१७१॥
संगमक्षामयोर्यूपतूर्ययोः समयस्य च ।
कम्बलिबाह्यमैरेयजन्यानां प्रचयस्य च ॥१७२॥
हिरण्यारण्यसख्यानां राजसूयकषाययोः ।
स्याद्वाजपेयमलयशल्यानां वलयस्य च ॥१७३॥
गोमयाव्ययकुल्यानां परिहार्यस्य चैव हि ।
कचियच्छत्रशिखरावराणां कूवरस्य च ॥१७४॥
पारावारातिखरयोस्तद्वद्वस्त्रोपवस्त्रयोः ।
कूटालिंजरवेराणां[1]मेढ्हिञ्जीरयोरपि ॥१७५॥
संसारतीरनीहारसूत्राणां तुवरस्य च ।
सहस्रवक्त्रनेत्राणां पत्रश्रृङ्गारयोस्तथा ॥१७६॥

---

१ मेढेति मूलपाठः।

केदारान्तरपद्माणां कर्णपूरपवित्रयोः ।
सीरांधकारसमरवप्राणां विशरस्य च ॥१७७॥

चक्रचुक्रकुलीराणां तुषाराङ्गारयोरपि ।
शिशिराडम्बरक्षीरकोटराणां ततोऽपि च ॥१७८॥

........गह्वराणां तिमिरभ्राष्ट्रयोस्तथा ।
राष्ट्रकुञ्जरतक्राणां वारकर्पूरयोरपि ॥१७९॥

जीरपञ्जरमञ्जीरजठराणां ततः परम् ।
युगंधरनूपुरयोर्दुरोदरकुटीरयोः ॥१८०॥

अपिवासरकासारविहाराणां तथापि च ।
स्यात्कान्तारतोमरयोर्वप्रकेसरयोस्ततः ॥१८१॥

करीरवज्रयोस्तद्वच्छेखरस्य पलस्य च ।
भालालवालभूलानां खलपल्वलयोरपि ॥१८२॥

पलालमूलमुकुलचषालानां नानस्य च ।
विशालतैलतूलानां स्यात्कुड्मलतमालयोः ॥१८३॥

कपालशैलकवलप्रवालानां चलस्य च ।
शवलोत्पलयोः शीलोपलयोर्मुसलस्य च ॥१८४॥

मलशालातुलनकमलानां हलस्य च ।
कङ्कालहालाहलयोः सौवर्चलमधूलयोः ॥१८५॥

स्याद्धलाहलजम्बालवल्कलानां ततः पुनः ।
सहेन्द्रनीलगरललाङ्गूलैः खण्डलस्य च ॥१८६॥

गाण्डीवगाण्डिवोल्वानां पार्श्वैस्त्रिदिवयोरपि ।
भावारावपारशवशरावाणां शवस्य च ॥१८७॥

क्लीबप्राग्रीवनिष्ठेवताण्डवानामथापि च ।
दैवपूर्वपल्लवानां लल्वकर्शांशयोरपि ॥१८८॥

कुलिशाकाशकोशानां तथा कणिशकाशयोः ।
पाशाङ्कुशोष्णीषवेषाम्बरीषाणां विषस्य च ॥१८९॥

शेषरोहिषमाषाणां प्रत्यूषामिषयोरपि ।
पेषक्रोषकरीषाणां तथैव यूषकर्षयोः ॥१९०॥

वर्षावतंसमासानां विसविष्कसयोरपि ।
रसकर्पासपनसमासानां दिवसस्य च ॥१९१॥

निर्यासांसोपवासानां मांसवीतंसयोरपि ।
चमसांसयोश्च गेहस्य निवहस्य गृहस्य च ॥१९२॥

तनूरुहस्नेहदोहलोहपुण्याहयोरपि ।
पटहस्याररिचटुकमण्डल्वगुलानुभिः ॥१९३॥

कशिपुस्थाण्डजन्तूनां जीवातोश्च पलाण्डुना ।
सिन्धुदोस्तितऊनां च कम्बुना सह सक्तुभिः ॥१९४॥

कर्माष्ठीवद्गुरुदन्तोममहिम्नां नाम पक्ष्मणोः ।
धनुषः स्यादिति क्लीबपुंसयोः प्रकृतिस्थिताः ॥१६५॥

स्वतस्थिलिंजेः सरकोऽनुतर्षे शललः शले ।
करकोऽब्दोपले कोशः शिम्बा खड्ग पिधानयोः ॥१६६॥

जीवः प्राणेषु केदारे वलजः पवने खलः ।
बहुलं वृत्तनक्षत्रपुराद्याभरणाभिधाः ॥१६७॥

भल्लातकामलकयोस्तारकाठकयोरपि ।
हरीतकपिटकयोस्तद्वद्विभीतकस्य च ॥१६८॥

विलिङ्गस्य स्फुलिङ्गस्य कपाटस्य पुटस्य च ।
वटवाटपुटानां च तटस्य शकटस्य च ॥१६९॥

पटपेटकटानां च तथैव मठकुण्डयोः ।
नीडस्य च विषाणस्य तूणकङ्कतयोरपि ॥२००॥

मुस्ताकुथेङ्गुदानां च जृम्भदाडिमयोरपि ।
पुरोदरप्रतिसरविवराणामतः पुनः ॥२०१॥

पात्रकन्दरवल्लूरछत्राणां नखरस्य च ।
प्राणालनालकुवलमृणालानामथापि च ॥२०२॥

स्याच्छृङ्खलमण्डलयोः पटलार्गलयोरपि ।
पूलकन्दलयोरित्थमवहेलस्य तत्पुनः ॥२०३॥

कलशस्य कटाहस्य रश्मिषष्ठ्योरितीहदिक् ।
परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ॥२०४॥

अर्थान्ताः प्राद्यलंप्राप्ताः पदपूर्वाः परोपगाः ।
तद्धितार्थो द्विगुः संख्या सर्वनामतदन्तकाः ॥२०५॥

प्रकृते लिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित् ।
हरीतक्यादिप्रकृतिर्नलिङ्गमतिवर्त्तते ॥२०६॥

वचनं खलतिकादिर्बह्वर्थोत्पत्तिपूर्वकम् ।
स्त्रीपुंनपुंसकानां तु सहोक्तौ परलिङ्गता ॥२०७॥

कृतः कर्त्तर्यसंज्ञायां कृत्याः कर्त्तरि कर्मणि ।
अणाद्यन्तास्ते न रक्ताद्यर्थे नानार्थभेदकाः ॥२०८॥

षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विधेये शेषे तु ज्ञेयं शिष्टप्रयोगतः ॥२०९॥

कल्पद्रा केशवकृते फलिते नाम सत्फलैः ।
स्त्र्यादीनामितिलिङ्गानां प्रकाण्डः सिद्धिमागतः ॥२१०॥

——

इति ह शब्दकल्पद्रु[1]ध्यसिकेशवनिर्मितः ।
भूर्भुवःस्वस्त्रिभिः काण्डैः संप्राप्तः सिद्धिमुत्तमाम् ॥१॥

[2]भ्रान्तेः पुरुषधर्मत्वं पांशुमत्वं क्षितेरिव ।
तच्छोध्यं लेखलेपाद्यैः स्वागारमिव पण्डितैः ॥२॥

श्रमेणानेन मे देवो दक्षिणामूर्त्तिरीश्वरः ।
विबुधैः सकलैः सा(र्धं प्रीयतां भगवानजः?) ॥३॥

इति केशवकृतः कल्पद्रुकोशः समाप्तः ॥

---

१ यँदि (Madras Cat) २ भ्रान्तेरित्याद्यपँचतुष्टयंC पुस्तके नास्ति ।

# GAEKWAD'S ORIENTAL SERIES.

**Critical editions of unprinted Sanskrit Works, edited by competent scholars, and published by the Oriental Institute, Baroda.**

BOOKS PUBLISHED.

Rs. A.

1. **Kāvyamīmāṁsā**: a work on poetics, by Rājaśekhara (880–920 A.D.): edited by C. D. Dalal, and R. Anantakrishna Sastry, 1916. Re-issue. 1924 .. .. 2–4

*This book has been set as a text-book by the Bombay and Patna Universities.*

2. **Naranārāyaṇānanda**: a poem on the Paurāṇic story of Arjuna and Kṛṣṇa's rambles on Mount Girnar, by Vastupāla, Minister of King Vīradhavala of Dholka, composed between Samvat 1277 and 1287, *i.e.*, A.D. 1221 and 1231: edited by C. D. Dalal and R. Anantakrishna Sastry, 1916 .. .. .. *out of print.*
3. **Tarkasaṅgraha**: a work on Philosophy (refutation of Vaiśeṣika theory of atomic creation) by Ānandajñāna or Ānandagiri, the famous commentators on S'aṅkarācārya's Bhāṣyas, who flourished in the latter half of the 13th century: edited by T. M. Tripathi, 1917 .. 2–0
4. **Pārthaparākrama**: a drama describing Arjuna's recovery of the cows of King Virāṭa, by Prahlādanadeva, the founder of Pālanpur and the younger brother of the Paramara king of Chandrāvatī (a state in Mārwār), and a feudatory of the kings of Guzerat, who was a Yuvarāja in Samvat 1220 or A.D 1164: edited by C. D. Dalal, 1917 .. .. .. .. 0–6
5. **Rāṣṭrauḍhavaṁśa**: an historical poem (Mahākāvya) describing the history of the Bāgulas of Mayūragiri, from Rāṣṭrauḍha, king of Kanauj and the originator of the dynasty, to Nārāyaṇa Shāh of Mayūragiri by Rudra Kavi, composed in S'aka 1518 or A.D. 1596: edited by Pandit Embar Krishnamacharya with Introduction by C. D. Dalal, 1917 .. .. .. 1–12
6. **Liṅgānuśāsana**: on Grammar, by Vāmana, who lived between the last quarter of the 8th century and the first quarter of the 9th century: edited by C. D. Dalal, 1918 .. .. .. .. 0–8
7. **Vasantavilāsa**: an historical poem (Mahākāvya) describing the life of Vastupāla and the history of

Rs. A.

Guzerat, by Bālachandrasūri (from Modheraka or Modhera in Kadi Prant, Baroda State), contemporary of Vastupāla, composed after his death for his son in Samvat 1296 (A.D. 1240): edited by C. D. Dalal, 1917. 1–8

8. **Rūpakaṣaṭkam**: six dramas by Vatsarāja, minister of Paramardideva of Kalinjara, who lived between the 2nd half of the 12th and the 1st quarter of 13th century: edited by C. D. Dalal, 1918 .. .. 2–4

9. **Mohaparājaya**: an allegorical drama describing the overcoming of King Moha (Temptation), or the conversion of Kumārapāla, the Chalukya King of Guzerat, to Jainism, by Yaśaḥpāla, an officer of King Ajayadeva, son of Kumārapāla, who reigned from A.D. 1229 to 1232: edited by Muni Chaturvijayaji with Introduction and Appendices by C. D. Dalal, 1918 .. 2–0

10. **Hammīramadamardana**: a drama glorifying the two brothers Vastupāla and Tejaḥpāla and their King Vīradhavala of Dholka, by Jayasiṁhasūri, pupil of Vīrasūri, and an Ācārya of the temple of Munisuvrata at Broach, composed between Samvat 1276 and 1286 or A.D. 1220 and 1239: edited by C. D. Dalal, 1920. 2–0

11. **Udayasundarīkathā**: a romance (Campū, in prose and poetry) by Soḍḍhala, a contemporary of and patronised by the three brothers Chchittarāja, Nāgārjuna, and Mummuṇirāja, successive rulers of Konkan, composed between A.D. 1026 and 1050: edited by C. D. Dalal and Pandit Embar Krishnamacharya, 1920 .. 2–4

12. **Mahāvidyāviḍambana**: a work on Nyāya Philosophy, by Bhaṭṭa Vādīndra who lived about A.D. 1210 to 1274: edited by M. R. Telang, 1920 .. .. 2–8

13. **Prācīnagurjarakāvysaṅgraha**: a collection of old Guzerati poems dating from 12th to 15th centuries A.D.: edited by C. D. Dalal, 1920 .. .. 2–4

14. **Kumārapālapratibodha**: a biographical work in Prākṛta, by Somaprabhāchārya, composed in Saṁvat 1241 or A.D. 1195: edited by Muni Jinavijayaji, 1920. 7–8

15. **Gaṇakārikā**: a work on Philosophy (Pāśupata School) by Bhāsarvajña who lived in the 2nd half of the 10th century: edited by C. D. Dalal, 1921 .. .. 1–4

16. **Saṅgītamakaranda**: a work on Music by Nārada: edited by M. R. Telang, 1920 .. .. .. 2–0

17. **Kavīndrācārya List**: list of Sanskrit works in the collection of Kavīndrācārya, a Benares Pandit (1656 A.D.): edited by R. Anantakrishna Shastry, with a foreword by Dr. Ganganatha Jha, 1921 .. .. 0–12

18. **Vārāhagṛhyasūtra**: Vedic ritual (domestic) of the Yajurveda: edited by Dr. R. Shamasastry, 1920 .. 0–10

19. **Lekhapaddhati**: a collection of models of state and private documents, dating from 8th to 15th centuries

| | | Rs. A. |
|---|---|---|
| | A.D.: edited by C. D. Dalal and G. K. Shrigondekar, 1925 .. .. .. .. .. | 2–0 |
| 20. | **Bhaviṣayattakahā or Pañcamīkahā**: a romance in Apabhraṁśa language by Dhanapāla (*circa* 12th century): edited by C. D. Dalal, and Dr. P. D. Gune, 1923. | 6–0 |
| 21. | **A Descriptive Catalogue of the Palm-leaf and Important Paper MSS. in the Bhandars at Jessalmere**, compiled by C. D. Dalal, and edited by Pandit L. B. Gandhi, 1923 .. .. .. | 3–4 |
| 22, 23. | **Paraśurāmakalpsūtra**: a work on Tantra, with commentary by Rāmeśvara and Paddhati by Umānanda: edited by A. Mahadeva Sastry, B.A. 2 vols., 1923. | 11–0 |
| 24. | **Tantrarahasya**: a work on the Prābhākara School of Pūrvamīmāṁsā, by Rāmānujācārya: edited by Dr. R. Shamasastry, 1923 .. .. .. | 1–8 |
| 25, 32. | **Samarāṅgaṇa**: a work on architecture, town-planning and engineering, by king Bhoja of Dhara (11th century): edited by Mahamahopadhyaya T. Gaṇapati Shastri, Ph.D. 2 vols., 1924-1925 .. | 10–0 |
| 26, 41. | **Sādhanamālā**: a Buddhist Tāntric text of rituals, dated 1165 A.D. consisting of 312 small works, composed by distinguished writers: edited by Benoytosh Bhattacharyya, M.A., Ph.D. 2 vols. vol. I, 1925, vol. II. *Shortly* .. .. .. .. | 5–0 |
| 27. | **A Descriptive Catalogue of MSS. in the Central Library, Baroda.** Vol. 1 (Veda, Vedalakṣaṇa and Upaniṣads), compiled by G. K. Shrigondekar, M.A. and K. S. Ramaswāmi Shastri, with a Preface by Dr. B. Bhattacharyya, Ph.D. 1925 .. .. | 6–0 |
| 28. | **Mānasollāsa or Abhilaṣitārthacintāmaṇi**: an encyclopædic work divided into one hundred chapters, treating of one hundred different topics by Someśvaradeva, a Chalukya king of the 12th century: edited by G. K. Shrigondekar, M.A., 3 vols. vol. I. 1925 .. | 2–12 |
| 29. | **Nalavilāsa**: a drama by Rāmchandrasūri, pupil of Hemachandrasūri, describing the Paurāṇika story of Nala and Damayantī: edited by G. K. Shrigondekar and L. B. Gandhi, 1926 .. .. .. | 2–4 |
| 30, 31. | **Tattvasaṅgraha**: a Buddhist philosophical work of the 8th century by S'āntarakṣita, a Professor at Nālandā with Pañjikā (commentary) by his disciple Kamalaśīla, also a Professor at Nālandā: edited by Pandit Embar Krishnamāchārya with a Foreword in English by Dr. B. Bhattacharyya, M.A. Ph.D. 2 vols. 1926 .. .. .. .. .. | 24–0 |
| 33, 34. | **Mirat-i-Ahmadi**: with its Khatimae or Supplement: By Ali Mahammad Khan, the last Moghul Dewan of Gujarat: edited in the original Persian by Syed Nawabali, Professor of Persian, Baroda College, 3 vols. (vol. I in the Press), vol. II. 1926 .. | 12–0 |

Rs. A.

35. **Mānavagṛhyasūtra**: a work on Vedic ritual (domestic) of the Yajurveda with the Bhāṣya of Aṣṭāvakra: edited with an introduction in Sanskrit by Pandit Rāmakrishna Harshaji S'āstrī, with a Preface by Prof. B. C. Lele, 1926 .. .. .. .. 5–0

36. **Nāṭyáśāstra**: of Bharata with the commentary of Abhinavagupta of Kashmir: edited by M. Ramakrishna Kavi, M.A. 4 vols, vol. I, illustrated, 1926 .. 6–0

37. **Apabhraṁs'akāvyatrayī**: consisting of three works, the Carcarī, Upadeśarasāyana and Kālasvarūpakulaka, by Jinadatta Sūri (12th century) with commentaries: edited by L. B. Gandhi .. .. *Shortly.*

38. **Nyāyapraveśa**, Part I (Sanskrit Text): on Buddhist Logic of Diṅnāga, with commentaries of Haribhadra Sūri and Pārśvadeva: edited by Principal A. B. Dhruva, M.A., LL.B., Pro-Vice-Chancellor, Hindu University, Benares .. .. .. *Shortly.*

39. **Nyāyapraveśa**, Part II (Tibetan Text): edited with introduction, notes, appendices, etc., by Pandit Vidhusekhara Bhattacharyya, Principal, Vidyabhavana, Visvabharati, 1927 .. .. .. .. 1–8

40. **Advayavajrasaṅgraha**: consisting of twenty short works on Buddhist philosophy by Advayavajra, a Buddhist savant belonging to the 11th century A.D., edited by Mahāmahopādhyāya Dr. Haraprasad Shastri, M.A., C.I.E., Hon. D. LITT. 1927 .. .. 2–0

42. **Kalpadrukośa**: standard work on Sanskrit Lexicography by Keśava: edited with an elaborate introduction and indexes by Pandit Ramavatara Sarma, M.A., Sahityacharya of Patna. In two volumes, vol. I, 1928. 10–0

43. **Mirat-i-Ahmadi Supplement**: by Ali Muhammad Khan. Translated into English from the original Persian by Mr. C. N. Seddon, I.C.S. (retired) and Prof. Syed Nawab Ali, M.A. Corrected Re-issue, *shortly*. .. 6–8

## BOOKS IN THE PRESS.

1. **Rāmacarita** of Abhinanda, Court poet of Hāravarṣa (cir. 9th century A.D.): edited by K. S. Ramaswami Shastri.

2. **Nāṭyadarpaṇa**: on dramaturgy by Ramacandra Suri with his own commentary: edited by Pandit L. B. Gandhi and G. K. Shrigondekar, M.A.

3. **Nātyaśāstra**: Vol. II. edited by M. Ramakrishna Kavi.

4 **Jayākhyasaṁhitā**: an authoritative Pāñcharātra work: edited by Pandit E. Kṛṣṇamacaryya of Vadtal.

5. **Buddhist works on Logic**: containing reconstructed texts from Chinese, Tibetan texts and English translation of Chinese texts of ancient authors like Nāgārjuna Vasubandhu, etc. by Prof. Giuseppe Tucci of Italy.

Rs. A.

6. **Mānasollāsa** or Abhilaṣitārthacintāmaṇi, vol. II. edited by G. K. Shrigondekar, M.A.
7. **A Descriptive Catalogue of MSS. in the Oriental Institute, Baroda,** vol. II (S'rauta, Dharma and Gṛhya Sūtras) compiled by the Library staff.
8. **A Descriptive Catalogue of MSS. in the Jain Bhandars at Pattan** ; edited from the notes of the late Mr. C. D. Dalal, by Pandit L. B. Gandhi, 2 vols.
9. **Bhāvaprakāśana** of S'āradātanaya : an ancient work on Dramaturgy : edited by Pandit Ramaswami Shastri, Oriental Institute, Baroda and His Holiness Yadugiri Yatiraja Swami, Melkot.
10. **Prajñopāyaviniścayasiddhi** of Anaṅgavajra and **Jñānasiddhi** of Indrabhūti : two important works belonging to the little known Vajrayāna school of Buddhism (8th century A.D.) : edited by Dr. B. Bhattacharyya Ph.D.
11. **Siddhāntabindu** : on Vedānta philosophy by Madhusūdana Sarasvatī with commentary of Puruṣottama : edited by P. C. Divanji, M.A., LL.M.
12. **Tathāgataguhyaka or Guhyasamāja** : the earliest and the most authoritative work of the Tantra School of the Buddhists : edited by Dr. B. Bhattacharya, Ph.D., Director, Oriental Institute, Baroda.
13. **Influence of Portuguese on the Asiatic Languages** : Translated into English from Portuguese by Prof. A. X. Soares, M.A., Baroda College, Baroda.
14. **Persian Chronicle** : history of the Safvi Period of Persian History 15th and 16th centuries by Hasan Ramlu : edited by C. N. Seddon, I.C.S. (*retired*), Reader in Persian and Marathi, University of Oxford.
15. **Nañjarājayaśobhūṣaṇa** : by Nṛsiṁhakavi *alias* Abhinava Kalidāsa, a work on Sanskrit Poetics and relates to the glorification of Nañjarāja, son of Vīrabhūpa of Mysore : edited by E. Krishnamacharya.

**PUBLISHED BY THE GOVERNMENT OF H.H. THE MAHARAJA GAEKWAD OF BARODA**

**Gazetteer of the Baroda State.** By Rao Bahadur Govindbhai H. Desai, B.A., LL.B., Naeb Dewan, Baroda State, and the late Principal A. B. Clarke, B.A. With map. 2 volumes, 1923, each Rs. 15.

**Census of India, 1921, Vol. XVII, Baroda.** By Satyavrata Mukerjea, B.A., Subah, Baroda Division, formerly Superintendent of Census Operations, Baroda State.

| In three parts 1921-22— | | Rs. | As. | P. |
|---|---|---|---|---|
| Part I Report .. | .. | 16 | 8 | 0 |
| ,, II Imperial Tables .. | .. | 9 | 0 | 0 |
| ,, III State Tables .. | .. | 4 | 8 | 0 |

**Mirat-i-Ahmadi,** the Original Persian Text. Edited by Professor Nawab Ali. In 3 volumes.

(*Gaekwad's Oriental Series. Vol. II, 1927, Rs 12. Vols. I and III are in the Press.*)

**English Translations** of Vols. I and II are also in preparation.

S403 K48lKa V.1

DATE OF ISSUE

This book must be returned within 3, 7, 14 days of its issue. A fine of ONE ANNA per day will be charged if the book is overdue.